The work— The SK is a short poem, dealing, as suggested by the first half of the title, with the sentiment of love of both the varieties, *Sambhoga* and *Vipralambha*. The latter half of the title is also significant. *Kallola* means a wave or a billow, and the hundred and one verses (excluding the first two benedictory verses and and the last one which expresses the author's estimate of his own work) are like different waves on the ocean of *Śṛṅgāra*. Just as the waves show an identity in difference—individually they are different from one another, but ultimately they are all one being water of the same ocean—the verses of this beautiful poem delineate different situations and feelings and moods of people in love with each other, but they all belong to the same sentiment of *Śṛṅgāra*. The author possesses felicity of phrase and his diction is very well suited to the sentiment. He conceives an interesting situation and knows how to express it in happy words. He expresses the feelings of a shy maiden on the morning after the amorous enjoyment with delicacy and understanding. About sixteen verses refer to a lady who is posssssed of self-respect, is offended with her husband (māninī) while about fifteen others depict the feelings of a lady in separation, her plight in the absence of her lover, her eagerness to meet him and the

exquisite joys on reunion. The hypocritical behaviour of a cunning lover who tries to please both of his beloveds at one and the same time is cleverly brought out. The *abhisārikā* is described in four verses and the charming coyness of a newly-wedded maiden is expressed in three others. A few verses bring out the natural beauty of ladies which requires no adornment or describe the taunt administered by a lady to her insincere female friend who dallied with her own lover. The complaint of a lady who gradually goes down in the estimation of her husband is really pathetic. A perusal of the poem will at once convince the readers that the SK is in no way inferior to the famous *Amaruśataka* and perhaps may have been inspired by it.

Metrical Analysis— The one hundred and four verses in the poem are written in fifteen different metres and the *Śārdūlavikrīḍita* is the dominant one in the SK as it is in the *Amaruśataka* also; 52 verses out of 104 are in this metre. All the metres of the SK are indicated below in the alphabetical order and the numbers of the verses which are written in them are shown in brackets just after them.

आर्या (12, 82).
इन्द्रवज्रा (42).
उद्गीति (80).
उपजाति (29).
पुष्पिताग्रा (70).
पृथ्वी (49, 50, 57).
मन्दाक्रान्ता (10, 28, 104).
मालिनी (1, 20–22, 40, 41, 63, 65–67, 76, 93, 94).
वंशस्थ (33).
वसन्ततिलका (60, 69, 84, 86, 91, 92).
शार्दूलविक्रीडित (2–9, 14, 15, 18, 19, 25–27, 30–32, 34–39, 43–46, 51, 52, 54–56, 61, 62, 64, 72–75, 77–79, 83, 85, 88, 89, 96, 99–102).
शिखरिणी (11, 13, 17, 23, 47, 48, 53, 58, 68, 71, 90, 95, 103).
स्रग्धरा (24).
स्वागता (16).
हरिणी (59, 81, 87, 97, 98).

I have tried my best to give the text as accurately as possible, but a few obscure passages indicated with a question mark after them still remain and I shall feel obliged to the scholarly readers of the *Annals* if they would favour me with their suggestions and criticism through the Editor, or by writing directly to me to the following address—

C/o Dr. H. G. Moghe, Linking Rd., Khar, Bombay 21.

रायभट्टकृतः

शृङ्गारकल्लोलः ।

ॐ

श्रीगणाधिपतये नमः ।

अनुनयति गिरीशे द्राक् परावर्तिताङ्ग्याः
स्फटिकभवनभित्तौ तन्मुखेन्दुं समीक्ष्य ।
पुनरभिवलितायाः विस्मयस्मेरमुख्या
जयति गिरिसुतायाः कोऽपि दृष्टिप्रसादः ॥ १ ॥

आनम्राः प्रथमं कृतागसं[1] इव व्यापारशून्यास्तथा
संरुद्धा इव कीलिता इव विनिर्याताः स्खलन्त्यस्ततः ।
कामारेर्भयभङ्गुरा इव मुखं स्मेरं स्पृशन्त्यः शनैः
पार्वत्याः[2] स्मरबन्धवो नवपरीहासे दृशः पान्तु वः ॥ २ ॥

उद्धृत्यापि पुरः पदं प्रियसखीवाक्यैः क्वणन्नूपुरं
नाक्रान्ता गृहदेहलीं नवसुधासिन्धूत्थचन्द्रानना ।
त्रुट्यत्कञ्चुकबन्धनातिविनमन्मूर्धांशुकापि स्थले
प्राप्ता चेन्मणिबन्धने नववधूः पुण्यैरगण्यैरलम् ॥ ३ ॥

अङ्गैरङ्गसमावृतिं विदधती व्यातन्वती सीत्कृतिं
पश्यन्त्याकुललोचना तत इतः खिद्यन्नखाङ्कं वपुः ।
जालात्तल्पगतां करेण दधती चैलभ्रमाच्चन्द्रिकां
तन्वङ्गी सुरतावसानसमये संसारसारायते ॥ ४ ॥

आकर्ण्य स्थगितं समाकुलमथो धारायितं दृक्पथं[3]
प्राप्ते स्फारितमङ्गणं विचलितं किंचिद्दिशत्यालयम् ।
सान्द्रं[4] स्वान्तिकमागते विनमितं संभाषमाणे प्रिये
दूराद्वागतवत्यहो मृगदृशो नेत्रं विचित्रायते ॥ ५ ॥

[1] Ms. कृतागम इव. [2] Ms. पार्वत्या स्म°. [3] Ms. दृक्पथं. [4] Ms. सांद्र स्वांति°,

आहूता तव नामतो भ्रमवशादित्यस्ति सा कोपना
  युक्तं सागसि मानिनीन्दुवदने यत्त्वं मयि प्रेयसि ।
इत्याकर्ण्य वचो विचित्ररचनं स्मेरानना प्रेयसो
  हस्तं न्यस्य मुखे सखेलमनयत्कान्ते दृगन्तच्छटाम् ॥ ६ ॥

गात्रं ते तुहिनाग्निलीढनलिनीमूलस्य धत्ते दशा-
  मास्येन्दुः करपङ्कजेन विधृतो हा निश्वसन् रोदिति ।
चेतोऽपि द्रुतमन्थकुन्थितदधिक्षोदायते साम्प्रतं
  कस्मै चण्डि निवारिताऽपि दयिते कामायमानं व्यथाः ॥ ७ ॥

एतत्कण्टकितं वपुस्तत इतो लूनं विकीर्णाः[1] कचाः
  प्रस्विन्नं मुखमण्डलं च नितरां खिन्नासि तन्वि स्फुटम् ।
संदष्टं मधुपेन दन्तवसनं यद्बन्धुजीवोपमं
  त्वं पुष्पावचये गता सखि पुनर्नो निर्घृणस्यान्तिकम्[2] ॥ ८ ॥

उत्कण्ठैकमयीं[3] तनुं कलयतोः क्लेशेन दीर्घं दिनं
  नीत्वा केलिमिलन्मनोरथशतैर्विश्लेषशेषे सति ।
दम्पत्योः सुचिरेण सङ्गमितयोर्विश्वं नवं जानतो-
  र्यूनोः कापि[4] विजृम्भते रसभरादाश्लेषसारा रतिः ॥ ९ ॥

वाचां गुम्फैरनुनयपरं हन्त हित्वैव कान्तं
  मानव्यूढा युवतिसदसि प्राङ्गणे संनिविष्टा ।
छायां मूर्ध्नः पदकमलयोः प्रापितां तेन तन्वी
  दृष्ट्वा तत्र प्रियसहचरं प्रैक्षत स्मेरवक्त्रा[5] ॥ १० ॥

सखि क्रोधावेशादहह दहता पञ्चविशिखं
  हितं किं लोकानां विहितममुना कामरिपुणा ।
पिशाचो यद्भूत्वा हृदयमयमाविश्य रभसा-
  दविज्ञातोपायो भुवनमखिलं व्याकुलयति ॥ ११ ॥

[1] Ms. विकिर्णाः क°. [2] Cf. अमरुशतक Stz. 105 (निर्णयसागर edn.). निःशेषच्युतचन्दनं etc. [3] उत्कण्ठैकमयां. [4] Ms. क्वापि. [5] Ms. स्मेरवक्त्रां.

मृगमदमपहरसि दृशा मृगमदशिल्पेन कल्पयाकल्पम् ।
अतुलैव जगति भवती किमिति तुलाकोटिमुद्वहति ॥ १२ ॥

तमिस्राणां स्तोमाः सपदि समरुन्धन्नुडुपतिं
कृताक्रोशावेशाजनि वियति तारावलिरपि ।
सकम्पं हेमाद्रिं विबुधसरिदाश्वासितवती
ततोऽहं नो जाने कनकलतिका किं पुनरभूत् ॥ १३ ॥

आयाते मयि नेक्षितं न गदितं संभाषिणि श्लिष्यति
व्याधूतं नमितं च चुम्बति मुखं तन्व्या सखीनां पुरः ।
आगस्कारिणि पादयोः प्रणिपतत्युत्थाय यान्त्या कियत्
प्रेयस्या परिवृत्य वीक्षितमहो तत्केन विस्मार्यते[1] ॥ १४ ॥

एकाङ्घ्रिं विनिधाय कान्तचरणे तज्जानुदेशेऽपरं
लीलोदञ्चितमध्यमा करयुगेनावर्ज्य तत्कन्धराम् ।
वक्षस्तस्य घनोन्नतस्तनभरेणापीड्य गाढं रसा-
दास्यं धन्यतमस्य पूर्णपुलका चन्द्रानना चुम्बति[2] ॥ १५ ॥

तल्पसीमनि समीक्ष्य शयानां
मूर्धतो लघु समेत्य विलासी ।
घ्रापयन्नधरसीधुमपि स्वं
सस्वदेऽधरसुधां नववध्वाः ॥ १६ ॥

तमस्तोमः सोमं गिलति वमतीहोडुनिचयं
रथाङ्गद्वन्द्वेऽस्मिन्नमरतटिनी खेलति मुहुः ।
तडिन्नृत्यत्युच्चैर्मधुरतरतारध्वनिरसै-
र्विपर्येति प्रायो रतिपतिमते सर्वमधुना[3] ॥ १७ ॥

---

[1] Quoted in the पद्यवेणी (No. 292) as of रायभट्ट, with यान्त्याः for यान्त्या and प्रेयस्याः for प्रेयस्या of our Ms. [2] Quoted in the पद्यवेणी (No. 311) as of रायभट्ट, with आवध्य for आवर्ज्य of our Ms. [3] Quoted anonymously in the सुभाषितरत्नभाण्डागार in the section on विपरीतरतक्रिया (p. 335 Stz. 15); the third line there is different : लतायामुत्कम्पो मदनवसती-काञ्चनगिरिः ।

हंसालिः कलनादमञ्चति रसादिन्दीवरं नृत्यति
प्रोद्यच्छीकरमम्बुजं मधुलिहां माला मुहुश्चुम्बति ।
शैवालं बिसवल्लिरेति लहरी नित्यं तटं ताडय-
त्यन्तःकम्पितपद्मकोशमनिलो मन्दं समुन्मीलति ॥ १८ ॥
पद्मं मुद्रितषट्पदं समजनि व्याकीर्णतारं नभः
पर्यस्तं तिमिरं च सौधशिखरे लोपं गता कौमुदी ।
कुण्ठः किं च कुहूरवोऽपि विरता भृङ्गावलीझङ्कृतिः
प्रेमाबन्धफलोदयस्य सुभगः कोऽप्येष कालक्रमः ॥ १९ ॥
क्षितितलमतितप्तं कामिनीनामिवान्त-
र्मदनविशिखतीक्ष्णाश्चण्डरोचेर्मयूखाः ।
युवतिकुचकठोराः सुन्दरग्राम्यवाच-
स्तदिह चतुरचित्ते चिन्त्यतां कृत्यभूमा ॥ २० ॥
मन इव रमणीनां वारुणी रागिणीयं
हृदयमिव[1] युवानस्तस्कराः स्वं हरन्ति ।
भवनमिव मदीयं नाथशून्यो हि देश-
स्तव न गमनमीहे पान्थ कामाभिराम ॥ २१ ॥
व्यनमि नयनयुग्मं पक्ष्मपुञ्जैर्वचोऽपि
प्रियसहचरि रुद्धं दन्तवासःकपाटात् ।
श्रवसि सपदि दत्ता चार्गलेवाङ्गुलिभ्यां
मिलति मनसि दुर्गे का गतिर्मानदुर्गे ॥ २२ ॥
करं संरुन्धाना कुटिलनयना कुञ्चितमुखी
नितान्तं कुप्यन्ती वपुरपहरन्ती मुहुरपि ।
नवोढा प्रत्यङ्गं प्रसभमुपगूढेयमधुना
धुनाना मूर्धानं मदनमतिवेलं मदयति ॥ २३ ॥
स्कन्धे विन्यस्य सद्या भुजमपरकरस्यार्धचन्द्रेण मध्यं
बिभ्राणा धूयमानस्तनतटवसना गन्धवाहेन मन्दम् ।

[1] Ms. हृदय इव.

पन्थानं दृग्विलासैरिव नलिनदलैः श्यामलैरास्तृणन्ती
सौधाग्रे कस्य साक्षात् परिणमति तपःसिद्धिरेषा सुवेषा ॥२४॥

कान्ते स्वागतमुत्थिता किमु, भवानास्तां, त्वयाप्यास्यतां
मा गच्छ, क नु गम्यते द्रुतमिदं पानीयमानीयते ।
पीतं संप्रति, साधु साधु विजये, सा किं समाहूयते,
ताम्बूलार्थमितीरितैश्चतुरया कोपः सनाथीकृतः ॥ २५ ॥

बिभ्राणा करजाङ्कमात्रलिखितं वक्षो विविक्तस्तनं
स्नानान्ते भृतकान्तिरच्छवसनप्रच्छादितांसावधिः ।
सख्या सर्वसुगन्धिसौरभभरैराधूपयन्ती कचान्
सृष्टिः कोकनदेक्षणा विजयते कस्यापि मानोरथी ॥ २६ ॥

प्रस्थाने शकुनानि सन्तु सततं भद्रं तवोज्जृम्भता-
मादायेप्सितमाशु तातचरणाम्भोजं समालोकयेः ।
याचेऽहं विधिमत्र हन्त जविनामग्रेसराणां मम
प्राणानां प्रिय मा स्म भूत् पथि भवद्विश्लेषलक्ष्मागमः ॥ २७ ॥

वीक्ष्यादर्शे विहितकबरीसंविधाना कराग्रे-
र्धृत्वा नीवीं विनमितमुखी सर्वतः संवृताङ्गी ।
गोपायन्ती दशनवसनेनोत्तरेणाधराङ्कं
मन्दं मन्दं कथमपि वधूर्निर्गता केलिगेहात् ॥ २८ ॥

वपुर्विभक्तं नवयौवनश्रीः सितं दुकूलं सहजोऽनुरागः
ताम्बूलमास्ये नयनेऽञ्जनं च परिच्छदोऽन्यो घनडिण्डिमारवः ॥२९॥

एकत्रैव समीक्ष्य सौधशिखरे कान्ते तयोरन्तिकं
गत्वा नव्यशशी न वीक्षित इति व्याहृत्य नेत्याहृताम् ।
बाहुभ्यां परिपीडितस्तनभरामुत्कन्धरामुन्नयन्
साच्यानम्रमुखः समुन्नतमुखीमन्यां प्रियश्चुम्बति ॥ ३० ॥

---

[1] Quoted anonymously in the सुभाषितरत्नभाण्डागार in the section on नायिकादर्शनम् (p. 274, Stz. 34). [2] Quoted in the पद्यवेणी No. (351) as of रायभट्ट, as an illustration of पवमत्पातिका with भूः for भूत् of our Ms.

एकत्रैव विलोक्य जातु दयिते गत्वा समीपं रसा-
 देकस्यां पटवासपूरमसकृद्व्याकीर्य तस्यामथ ।
मीलन्त्यां नयनाम्बुजे करयुगेनोद्दामहासोऽपरा-
 मन्तःस्मेरमुखीमुपानतमुखो धूर्तश्चिरं चुम्बति ॥ ३१ ॥

मन्दस्पन्दितपाणिधीरवलयं न्यञ्चत्कफोणि[1]स्फुर-
 द्धस्तन्यस्तसुदर्पणं स्तनतटस्पृष्टप्रकोष्ठान्तरम् ।
संरुद्धाश्रु विलोलतारमचलत्पक्ष्मोन्नमद्भ्रूलतं
 चेतः कस्य न हन्त हन्ति ददती बाला दृशोरञ्जनम् ॥ ३२ ॥

पुरो गुरूणां प्रियवाचिकं मुदा
 दूती मुहुः शंसति कातरेक्षणा ।
निवेशयन्ती किमु तद्वचोमृतं
 कण्डूयते कर्णपुटं कनिष्ठया ॥ ३३ ॥

कान्त त्वद्विरहेण हा कवलितेऽप्यापाक[2]रूपाग्निना
 मत्सख्या हृदये चिरेण वसतः स्पर्शोऽपि नोष्णस्तव ।
तत् सत्यं मिहिकाभिरङ्ग विधिना नूनं भवान्निर्मित-
 स्तच्चित्रं बत नो द्रुतोऽपि यदभूः शाम्येत येनानिलः ॥ ३४ ॥

हस्ताग्रेण मुहुः सखीं प्रणुदतीं द्राक् कूर्परेण घ्नतीं
 याहीति प्रियवादिनीं कुटिलया क्रोधाद् दृशा वीक्षते ।
आनासानमितावगुण्ठनपटीं पत्यापि कृष्टा करे
 वामाङ्गेन चिरं न मुञ्चति गृहालिन्दं नवोढा वधूः ॥ ३५ ॥

तल्पेऽनल्पविवर्तनानि तनुते हस्तं हृदि न्यस्यति
 श्वासं मुञ्चति भाषते प्रियसखीं कण्ठे समालिङ्गति ।
यात्यायाति गृहेऽङ्गणे च कुरुते हिन्दोलिकान्दोलनं
 स्वाङ्गैर्भूषितभूषणेति पदवीमालोकते प्रेयसः ॥ ३६ ॥

[1] कफोणिः, elbow. [2] आपाकः, a baking oven, a potter's kiln.

अर्धोन्मीलितशोणपद्मसदृशा तिर्यग्दृशा वीक्षते
   सोल्लुण्ठं चतुरां सखीमभिमुखीकृत्य प्रियं भाषते ।
आगोऽपि श्रमितं स्मितेन तनुते प्राणप्रियस्याधुना
   कोपोऽप्येष मनोहरो मृगदृशः कीदृक्प्रसादोदयः ॥ ३७ ॥

दूरादीक्षितुमुन्नतं नमयते नेत्रं प्रयत्नादसौ
   तन्वी रूक्षयते हठेन सहजस्मेरं मुखाम्भोरुहम् ।
अन्तः प्रेमरसं बहिः कठिनतामाबिभ्रती शोभते
   क्षीराब्धेरिव पङ्किला पुलिनभूर्मानग्रहे नूतने ॥ ३८ ॥

ध्मान्तः केकितनूरुहैः क्षणरुचिज्वालावलीरुद्गमन्[1]
   चञ्चच्चन्द्रवधूस्फुलिङ्गनिवहः स्नेहप्रवाहाप्लुतः ।
व्योमव्यापि पयोदधूमपटलः पाथोदकालेऽधुना
   पान्थानां हृदयेन्धनं[2] कवलयन् कामानलो वर्धते ॥ ३९ ॥

हृदयमजहतेव प्रेयसा नीयमाना
   तरुणमदनधुर्येणोह्यमानेव तन्वी ।
अरुणितसकलाशे चानुरागेण गाढे
   ऽप्यभिसरति तमिस्रे हन्त सङ्केतदेशम् ॥ ४० ॥

अभिकमभिसरन्त्या[3] नीरदानीकिनीभि-
   र्निबिडतरतमिस्रे मार्गमन्वेषयन्त्याः ।
परपरिचयशङ्कामात्मनो वारयन्त्या-
   स्तडिति युगपदासीत्सख्यवैराभियोगः ॥ ४१ ॥

सङ्केतदेशं समभिव्रजन्त्याः
   पङ्केरुहाक्ष्या हृदयादिवेत्य ।
कान्तः पथि ध्वान्तघने प्रियायाः
   प्रत्यङ्गमालिङ्गनमाततान ॥ ४२ ॥

[1] क्षणरुचि, lightning.   [2] Ms. हृदयेधनं.   [3] Ms. अलिकमाभि°. It must be अभिक, a lover.

रागः कोऽपि तनौ जवान्निविशते नीरं यथा सैकते
  पायं पायमपीक्षणे न जहतस्तृष्णां तृषार्तो यथा ।
चेतो मग्नमिवोत्थितं प्रियतमे प्राप्ते चिरात्प्रोषिते
  किं चेयं विधिना पुनर्वरतनुः सृष्टेव संलक्ष्यते ॥ ४३ ॥

कृता दूरे पत्युर्नतिविनतिवाचः स[1]शपथाः
  प्रियाणामालीनामपि न हितवाक्यं विगणितम् ।
रहस्यं प्राचीनं सपदि पुरतो जल्पति शुके
  कृता सभ्रूभङ्गि स्मितवदनया दृक्परिणतिः ॥ ४४ ॥

लीलोदञ्चितपाणिपल्लवयुगेनोन्मुच्य वीटीं[2] शनैः
  किञ्चित्कुञ्चितनासमानतमुखी सीत्कृत्य कूर्पासकम्[3] ।
उत्तायार्द्रनखाङ्कलग्नमुरसि व्यातन्वती फूत्कृतिं
  दृष्ट्वाग्रे प्रियमञ्चलेन वलते स्मेराननेन्दुर्वधूः ॥ ४५ ॥

मा यासीरिति नोदितं न ग[4]दितं गन्तासि कुत्रेति वा
  नो[5] वा सायमुपेष्यसीति भणितं प्रस्थातुकामे प्रिये ।
किन्तूच्छाससमीरणैः सह भृशं संमोहयन्त्या घनै-
व
  रासारैर्नयनाम्बुवाहसलिलैस्तन्व्या कृतं दुर्दिनम् ॥ ४६ ॥

नवीनं नेपथ्यं मधुरमनुवेलं कलयते
  विवृत्ताङ्गी हित्वा सपदि पदवीं तिष्ठति पुरः ।
दृगन्तैराहन्ति प्रतिपदमनालक्षितमियं
  मनो मे मीनाक्षी समधिकमनङ्गाद्व्यथयति ॥ ४७ ॥

[6]पुरो यान्ती मन्दं नवरचितनेपथ्यविधिना
  पथि स्थायं स्थायं सपदि विनमत्यूर्ध्व[7]वपुषा ।
नमत्पक्ष्मश्रेणीमलघु चलयन्ती दृशमसा-
  वकाण्डे वामाक्षी भ्रमयति करेणाङ्घ्रिकटकम् ॥ ४८ ॥

[1] Ms. शसपथाः. [2] वीटी, knot of a garment. [3] कूर्पासकं, a sor of bodice worn by women. [4] Ms. गणितं. [5] Ms. किं. [6] Ms. M s. विनमत्यूर्द्ध्ववपुषा. ऊर्ध्ववपुः = ऊर्ध्वकाय, upper part of the body.

अयं सहजशीतलः कुसुमसौरभैर्मन्थरो
मृदुर्मलयमारुतः सखि न याति यत्र प्रियः।
रसालशिखरेषु चेद्रतिपतेर्निदेशाक्षरं
पठन्ति पिकयूथपाः कथय को नु गन्तुं क्षमः॥ ४९॥

इहैव मृगलाञ्छनः कथय तत्र नो द्योतते
यदेष मधुयामिनीष्वपि हि नागतो वल्लभः।
इति भ्रमितचेतना विरहिणी यदत्रान्तरे
कुहूरिति समुज्जगावशनिपातवत्कोकिलः॥ ५०॥

आनत्या नयनोत्सवो नियमितो मौनेन वाग्विभ्रमः
पाणिभ्यां च कपोलपालिपुलकः कम्पस्तनोः स्तम्भितः।
आस्तां मानविधौ बहिः कथमपि स्यादभ्युपायो हि कः
स्वान्तस्थं प्रति चेतसः सखि बलादाकारसङ्गोपने॥ ५१॥

बद्धा चेद्भ्रुकुटिर्वरं सुनयने दृष्ट्या तया वीक्षणं
कार्यश्चेत् कलकण्ठि जातु कलहो वाच्याः कठोरा गिरः।
काठिन्यं हृदि चेद्दधासि सरले शय्या कुतः प्रोज्झिता
प्रौढ्या कुप्यसि चेदलं प्रियतमे कोपः प्रसादावधिः॥ ५२॥

स्तनाभ्यां काठिन्यं सुमुखि हृदयं नीतमधुना
दृशावाताम्रत्वं दशनवसनेनाधिगमिते।
भ्रुवो भङ्गिर्भावं कुटिलतरमध्यापि चिकुरैः
कृतामीभिः कोपे तव मदपराधप्रतिकृतिः॥ ५३॥

आलोक्यैव पुरः प्रियं कुटिलता यत्नान्निधेया दृशो-
राभाष्यैव तमागसोऽप्यभिमुखं कार्योऽभियोगः किल।
आवेश्यैव हृदीश्वरं च हृदये त्याज्योऽनुरोधो यतः
सख्यः कोपकथा कथं प्रियतमे संभाव्यते सुभ्रुवाम्॥ ५४॥

[1] Ms. पठिंति कपियूथपाः. [2] Ms. न.

सम्बाधो दयितस्य हन्त हृदि चेत्काठिन्यमालम्बते
नो शक्यः खलु निग्रहोऽपि मनसो राज्ये मनोजन्मनः ।
प्रेमा कीदृश एष यत्प्रियतमे भर्तुः समुद्भाव्यते
तन्मां शिक्षयताधुना विदधते गानं कथं योषितः ॥ ५५

सागस्यन्तिकमागते प्रियतमे कोपेन साकूतया
नो शय्या सुसमीकृता खलु मया नो वासनं कल्पितम् ।
सख्यः किं करवाणि यद्यनुमतौ दत्तं मनोजन्मनः
स्वस्मिन्नेव ममावशेन मनसा तस्मै निवेशस्थलम् ॥ ५६

स्फुरत्यधरपल्लवश्चलति चारु नासापुटी
कपोलफलकं क्रमादरुणिमानमालम्बते ।
उदञ्चति न च स्मितं त्यजति नालिकं भ्रूलता
नतभ्रुवि विजृम्भते कलय कोऽपि कोपक्रमः ॥ ५७ ॥

न विस्मर्तुं शक्यं तदिह लुलिते कुन्तलभरे
कले काञ्चीदाम्नि त्रुटिवति च माल्येऽपि गलिते ।
भजन्ती पुंभावं रतिरभसमुन्नीतचिकुरा
मुहुः कान्ता कर्णे शिथिलमवतंसं यदसजत् ॥ ५८ ॥

अचिरमुदयत्पुंभावाया रसाकुलचेतसः
सपदि शिथिले काञ्चीदाम्नि श्लथेऽप्यवतंसके ।
श्रवसि जघने वारंवारं करस्य समागमः
सुरतरभसे नूनं विघ्नो महान् युवतेरभूत् ॥ ५९ ॥

तस्याः शिवं श्वसिति गात्रमदर्शि रूपं
दृष्टं नु संचरति निःश्वसितानि यान्ति ।
निद्राति सा निमिषति प्रतिव्यक्ति नाथे-
त्यालीर्वदत्यवति जीवमसौ त्वमेव ॥ ६० ॥

Ms. योषितांम्.   [4] Ms. त्रुटघति.

लावण्ये[1] परिनिष्ठितं वपुरभून्निद्रा निमेषावधिः
संचारः श्वसितेषु पर्यवसितः सार्द्रत्वमक्ष्णोः स्थितम् ।
विश्लेषे तव कान्त कातरदृशोदौंस्थ्यं कियद्वर्ण्यतां
स्वावस्थां सुतनोर्विधातुमतनोर्मन्ये महानुद्यमः ॥ ६१ ॥

विश्लेषे मदनाभिराम भवतस्तस्याः कथं वर्ण्यते-
ऽवस्था संप्रति पञ्चभूतनिवहे क्षोणी तु नालक्ष्यते ।
नीरं नेत्रयुगे व्यवस्थितमभूदग्निः स्वभावस्तनोः
श्वासा एव समीरणः समभवन्नङ्गानि चासन्नभः ॥ ६२ ॥

येदवधि[2] हृतमन्तः[3] कामकान्त त्वयास्या-
स्तदवधि कमनीयं बुध्यते नाम नार्थम् ।
विनिमयमपि चेतः स्वस्य चेदस्य दद्याः
सुचरित चरितार्था तावता सारसाक्षी ॥ ६३ ॥

रज्येते मनसा सहैव नयने साकं च धृत्या भ्रुवौ
भज्येते रदनच्छदोऽपि सहितो नेत्राञ्चलैर्नृत्यति ।
नासा चाङ्गरुहैः प्रहृष्यति समं कोऽपि प्रपञ्चोऽधुना
प्रेयस्याः प्रथमागसि प्रियतमे रम्यः समुज्जृम्भते ॥ ६४ ॥

भुवनमदन दूत्यां त्वद्गुणौघं[4] वदन्त्या-
मतिरतिपति तस्याः सारसाक्ष्याः समक्षम् ।
सपदि सममुदीतः कर्णपीयूषवर्षी
रहसि सहचरीणां छोटिकानां निनादः ॥ ६५ ॥

सुभग तव कथायां श्रोत्रपान्थीकृतायां
समुदयति सुमुख्या जृम्भिते साङ्गभङ्गे ।
स्तिमितमलसमीषन्मीलितं कोणशोणं
नयननलिनयुग्मं कामवस्थां न तेने ॥ ६६ ॥

---

[1] Cf. अनुदिवसं परिहीयसेऽङ्गैः । केवलं लावण्यमयी छाया त्वां न मुञ्चति । Śākuntala 3. 8. 23. [2] Ms. यदवधि. [3] Ms. हृत°. [4] Ms. त्वद्गुणाघेःव°.

प्रणयिनि परिहासं काप्यवाक्षीदिह त्वा-
मिति कुमतिमवाक्षीराविलाक्षी किमस्त्रैः ।
सपदि किमु न पृच्छेः सारसाक्षीममर्थं[1]
वदतु मम समक्षं सारसाक्षी मनोजः ॥ ६७ ॥

अभूदेकं चेतः प्रथममथ नूनं विनिमय-[2]
स्तयोरासीत् पश्चादजनिपि पराम्यः प्रियतमा ।
इदानीं मान्याहं बत सकलगेहव्यवहृता-
वमी प्राणाः पापाः स्फुटमनुभवन्तु स्थितिफलम् ॥ ६८ ॥

विज्ञापयामि कृपणा भवतोऽनवद्या
विद्यास्ति कापि परकायनिवेशसिद्धेः ।
मह्यं प्रयच्छ करुणाकर काममेनां
शिष्यास्मि नाथ तव पादयुगं[3] प्रपन्ना ॥ ६९ ॥

विनमितवदना पुरो गुरूणां
हसितमुखीसखीषु साभ्यसूया ।
विनिहितहृदया प्रिये नताङ्गी
विलसति नूतनसङ्गमप्रभाते ॥ ७० ॥

पुरा भस्मानङ्गो हरनयनदीपेन यदभू-
दयीदानीं दीपादुदयति तदेवाञ्जनमिषात् ।
स्फुटं तस्यासङ्गाद्युवजनमनोमोहनविधौ
दृगन्तैः कान्तानां बत सपदि बद्धः परिकरः ॥ ७१ ॥

आयातो दयितः प्रसाधय तनुं मुञ्चाधुना शैशवं
धैर्यं धत्स्व सरोरुहाक्षि शयनागारं समावेक्षसे ।
बाला सेति पुरन्ध्रिभिर्निगदिता नोवाच किंचित्तदा
कर्णं केवलमेव वामनयना कण्डूयमाना स्थिता ॥ ७२ ॥

---

[1] i. e. सारसाक्षि इमं अर्थं. [2] Ms. विनमयंस्तयो°. [3] Ms. °युगं.

नो शय्या नलिनीदलैर्विरचिता द्राङ्मुर्मुराशङ्कया
कण्ठे भारभियानया बिसलताहारोऽपि नारोपितः ।
भीतेयं मलयानिलान्मलयजेनालिप्य नोद्वीजिता
हा कष्टं दवथुव्यथा मृगदृशो [1]मेऽवापनेया कथम् ॥ ७३ ॥

मल्लीदाम कचेषु मूर्धनि मृणालाग्रं ललाटे छदं
[2]शोणाब्जस्य गलेऽसिताम्बुजदलं पाटीरलेपं तनौ ।
बिभ्राणो बिसवल्लरीं च हृदये तद्भीतिहेतोरहं
हा कष्टं कुपितेन तेन निहतो वैरानुबन्धादिह ॥ ७४ ॥

पाणिभ्यां परिमृज्य किं [3]नयनयो रागः समाधीयते
प्रच्छाद्यैव तदङ्गरागपटलीं सङ्गोऽपि किं गोप्यते ।
प्रेयस्यञ्जनरञ्जिताधरपुटीमेवोचितां लक्ष्मणो
लक्ष्मीं संजनयत्यतीव कितव व्यक्तां मुखेन्दौ तव ॥ ७५ ॥

उषसि रहसि कान्ता स्वान्तिके कान्तमेतं
विहितविनयवेषं सर्वतः संवृताङ्गम् ।
चटुवचनपटूक्तिं वीक्षि दक्षा मृगाक्षी-
मियमिलदुपचारा दर्पणेनोपतस्थे (?) ॥ ७६ ॥

मा स्पर्शं पदयोर्ममाचर शठाचाराधुना त्वं मुधा
दूरेऽपत्रप याहि किं वितनुषे स्वाकारसंगोपनम् ।
एतत्पश्य तदङ्गसङ्गजनितश्यामाङ्कमा[4]स्यं तव
[5]दृष्ट्वा जातघृणो द्रुतं द्विजपतिः प्रत्यग्गिरिं प्रस्थितः ॥ ७७ ॥

वक्त्रस्य प्रतिबिम्ब एष भवतो दोषाकरस्येति य-
न्मन्यन्ते कवयस्तथैव तदिति प्रायो मया निश्चितम् ।
नैवं चेत्कथमन्यथा सितरुचेः पीयूषरश्मेरिदं
मत्संतापकरं विधोरनुचितं स्यादाञ्जनं लाञ्छनम् ॥ ७८ ॥

[1] Ms. मेधायनेया. [2] Ms. शोणाज्वस्य. [3] Ms. नयनयं रागः.
[4] Ms. °मान्यं. [5] Ms. दृष्टुं.

अन्यस्या मलिनाञ्चलस्य नयनाम्भोजस्य[1] सङ्गादभू-
देतस्यास्य कुमुद्वतीसहचरस्येदं कथं लाञ्छनम् ।
इत्थं जातविकत्थनो गतरुचिः सिन्धौ सुबन्धोरयं
नूनं मज्जति लज्जया द्विजपतिर्निस्त्रिंश पश्याधुना ॥ ७९ ॥

प्रज्वलति विरहदहने मा वीजय तालवृन्तेन ।
मुग्धे विधूयमाना समधिकमेवैधतेऽनलज्वाला[2] ॥ ८० ॥

कुसुमविशिखश्चेतोजन्मा ममेति गतः[3] श्रुतिं
प्रलयदहनप्रायः कस्मादभूदिदमद्भुतम्[4] ।
विदितममरं मत्वाद्यापि क्रुधा प्रदहत्यमुं
त्रिपुरमथनो नूनं नेत्रज्वलज्ज्वलनोच्चयैः[5] ॥ ८१ ॥

तस्याः संप्रति देहं विरहे दहने दहत्युच्चैः ।
कान्त भवन्तमवन्तं नोज्झति भीत्येव विद्रुतं चेतः ॥ ८२ ॥

तापं प्रापयतां तनोतु ननुतां[6] कामं तु कामस्तनो-
र्विश्लेषं सहते हि या क्षणमपि प्राणाधिकप्रेयसः ।
न प्रेयांसममुञ्च्यमञ्चदधुना नित्यं तदासङ्गि यत्
पापस्तापयते कथं सखि मनो नूनं मनोभूरिदम् ॥ ८३ ॥

नाथ त्वदीयविरहे विषमे मृगाक्ष्याः
पुष्पाशुगप्रबलवह्निविदह्यमानम् ।
नो मुञ्चतु प्रचुरलोचनवारिपूरं
स्नेहेन हन्त वपुरिन्धनमार्द्रमस्याः ॥ ८४ ॥

एकेनैव शरेण हन्त हृदयं हन्यात् स्मरश्चेत्तदा
प्रेयस्या विरहे सुखेन निरियुः[7] प्राणाः कृतार्था इमे ।
ओतप्रोतमनन्तरैरिह शरैर्यन्मे विधत्ते वपु-
र्निर्यातुं प्रभवन्त्यमी न हि पथोऽभावात्ततः संप्रति ॥ ८५ ॥

---

1 Ms. नयनांभोजसंगा°. Emendation required by exigency of metre.
2 Ms. °नेनज्वाला. 3 Ms. गतश्रुतिं. 4 Ms. °मभूदिदमद्भुतं. 5 Ms. मलयमत्वा.
6 Ms. ननुत. 7 Ms. सुखनिर्ग्युः. Emendation, *metre causa.*

सागस्यपि प्रियतमे[1] सविधं समेते
  धन्ये शुभोदयिनि दत्तपदापि गाने ।
पारावतं प्रणयिनीमभितो भ्रमन्तं
  कान्ता कलक्वणितगर्भगलं[2] ददर्श ॥ ८६ ॥

प्रथमविहिते मानेऽधीतं सखीमुखतो यथा
  प्रणयवचनप्रत्याख्यानं विधाय तथैव[3] सा ।
प्रथयति परामुक्तिं कान्ते कपोलतलोल्लस-[4]
  त्पुलकमुकुलां स्मेरं स्मेरं[5] सखीमुखमीक्षते ॥ ८७ ॥

अद्यास्तु प्रतिरोमकूपमिषुभिः कीर्णं पुनः कौसुमैः
  क्रोधाद्वा स्वयमेव धावतु धनुस्तूणीरशेषः स्मरः[6] ।
आप्रत्यूषमपि प्रयातु रजनी कान्ताङ्गसङ्गं विना
  हे सख्यः शृणुताधुना परिकरो मानाय बद्धो मया ॥ ८८ ॥

शून्येऽस्मिञ्छयनं भजेति वचनैरालीजने प्रस्थिते
  बाला तत्र समागते प्रियतमे संभाषमाणे सति ।
नोचे किञ्चन नोत्थिता न वलिता निद्राश्लथेन स्थिता
  किन्तु प्रोत्थितगण्डपालिपुलकैरावेदिता केवलम् ॥ ८९ ॥

श्लथा भूयो भूयो भवति रशना बन्धनविधौ
  न साम्यं लेखानामजनि मकरीपत्रलिखने[7] ।

  .... ॥ ९० ॥

रोमाङ्कुरोद्गमवति स्तनशातकुम्भ-
  कुम्भे कथंचिदपि पत्रविधिं समाप्य ।
रत्युत्सवाय सुदृशो हृदये निधातुं
  हारं प्रियः करगतागतमाततान ॥ ९१ ॥

---

[1] Ms. प्रियते. [2] Ms. °हलं. [3] Ms. तथैव प्रथयति. Emendation, *metre causa*. [4] Ms. कपोलतलोल्लसत्°. [5] Ms. स्मरं only once. [6] Ms. °शेष स्मरः. [7] 3rd and 4th lines are missing in the Ms.

नेपालिकामकुलवञ्जुलदामहस्ता-
मालीं विलोक्य कुपितेन वधूर्बभाषे ।
का प्रीतिरस्ति सखि ते कलिकावचाये
पुष्पं नम्रमरसौष्पकृतो हिवल्यः (?) ॥ ९२ ॥

सविनयमनुनीतानागसि प्राणनाथे
मयि न भजसि भावं भामिनी कस्य हेतोः ।
अतिरति तव रूपं वीक्ष्य मुग्धो भवत्यां
भवति शिथिलमुष्टिः प्रायशः पुष्पधन्वा ॥ ९३ ॥

अयि भजसि रतीशं वामनेत्रे किमित्थं
तदिषुभिरवशाहं त्वं तु तेनार्दितोऽपि ।
कितव न रतिमेतामुज्झसि ब्रूहि कस्मा-
दिति विलसति यूनोः कोऽपि गोष्ठीविनोदः ॥ ९४ ॥

उदस्राक्षीः पूर्वं दयितमुपनीतं बत पदो-
रुदस्राक्षी हित्वा धृतमथ विलक्षीभवसि किम् ।
मम स्राक्षीद्रामानयनविधना चेत्प्रियतमं
किमस्राक्षीद्वेधाः स्मरमपि न तत्र प्रतिभुवम् (?) ॥ ९५

नासाकर्णविभूषणं मरकतैः कृत्वा त्विषं गण्डयो-
रादर्शे मुहुरीक्षते मृगमदैः[1] पट्टीं विधत्तेऽलिके[2] ।
बारंवारमुपैति याति शनकैरावृत्य नीलाम्बरं
व्यापारैरितिरैरात्रिमेव[3] तरुणी निन्येऽभिसारे नवे ॥ ९६ ॥

प्रकुपितसखीवेषं कृत्वा क्वचिद्रहसि स्थितं
प्रियसहचरीभ्रान्त्या कान्तं प्रसादयितुं गता ।

---

1 Ms. °मदै पट्टीं. 2 अलिकं, forehead. 3 Ms. व्यापारैरिति°.

प्रणयवचनैर्गाढाश्लेषैर्हठात्परिचुम्बनै

रमयतितमां मुग्धा धन्यं दृढापि हठे वधूः ॥ ९७ ॥

विरहसमये ध्यानावेशादभूदितरेतरं

दयिततमयोर्नूनं यूनोः स्वभावविपर्ययः ।

सपदि मिलने जातेऽपीमौ चिराय तथा स्थिता-

वपि विनिमयं संजानीतो[1] यदा[2] प्रकृतं रतम् ॥ ९८ ॥

आत्मा चेद्भवती कथं नु नयनाद्यानन्दसान्द्रोत्सव-

स्तस्मात्त्वं बहिरन्तरा प्रणयिनी कान्ते त्वमेवासि मे[3] ।

.... ॥ ९९ ॥

आताम्रः समुदेति देशय चलच्चक्षुश्चकोरद्वयं

मन्दं मन्दमुपैति वेल्लय वलद्वेणीभुजङ्गीमिमाम् ।

कूजत्युन्मद एष मिश्रय मुखे वाणीसुधामित्यसौ

सख्योः कापि विदग्धमुग्धमधुरा गोष्ठी समुज्जृम्भते ॥ १०० ॥

पश्यन्ती तमहर्निशं प्रतिदिशं नानाविनोदान्वितं[4]

विश्लेषे दृढभावनापरिचयात् सुप्तापि जाग्रत्यपि ।

तत्कालेऽन्तिकमागतं प्रियतमं संभाषमाणं मुहु-

स्तेभ्यः सत्यममुं विवेक्तुमभवन्नालं विलोलेक्षणा ॥ १०१ ॥

नेदं नीरदमण्डलं न च घनासारा इमे साम्प्रतं

किन्तु त्वद्विरहानलोषितहृदस्तन्व्याः प्रिय प्रायशः ।

निर्यन्निश्वसिताढ्यधूमपटलं व्याप्नोत्यरन्ध्रं नभः

स्वस्थानाच्च पतन्ति तद्व्यतिकरान्नेत्राम्बुधाराकराः ॥ १०२ ॥

1 Ms. संजानीते. 2 Ms. यदा. 3 lines 3 and 4 are missing in the Ms. 4 Ms. °विनोदान्विते.

अहं सा सैवाहं तदिदमिति लोकव्यवहृतिं
　न जाने प्रेमाणं परमिह ततो नापि विरहम् ।
रहस्यं नोऽजानान्निखिलमिदमानन्दनिगमं
　मुधैवार्धैरङ्गैः समसृजत देव्याः पशुपतिः ॥ १०३ ॥

गुम्फो वाचां मसृणमधुरो मालतीनामिवस्या-
　दर्थो वाच्यः प्रसरणपरः सम्मितः सौरभस्य ।
भावव्यङ्ग्यो रस इव रसस्तद्वदाह्लादहेतु-
　र्मालेवासौ सुकविरचना कस्य भूषां न धत्ते ॥ १०४ ॥

इति श्रीमहाकविपण्डितश्रीमद्रायभट्टकृतं शृङ्गारकल्लोलं नाम काव्यं संपूर्णम् ।

---

[1] Ms. तत्तादिदमिति.　[2] Ms. रसस्तद्विधाह्लादहेतु०.

INDEX OF STANZAS IN THE शृङ्गारकल्लोल OF रायभट्ट

प्रस्थाने शकुनानि सन्तु सततं २७
Quoted in the पद्यवेणी as of रायभट्ट.
बद्धा चेद्भ्रुकुटिर्वरं सुनयने ५२
बिभ्राणा करजाङ्कमात्रलिखितं २६
भुवनमदन तुल्यां त्वद्गुणौघे वदन्त्यां ६५
मत्त इव रमणीनां वारुणी° २१
मन्दस्पन्दितपाणिधीरवलय ३२
मल्लीदामकचेषु मूर्धनि मृणालाग्रं ७४
मायासीरिति नोदितं न भणितं ४६
मा स्पर्श पद्योर्ममाचर शठाचार° ७७
मृगमदमपहरसि वृथा १२
यदवधि हतमन्तः कामकान्त ६३
रज्येते मनसा सहैव नयने ६४
रागः कोऽपि ततो जवान्निविशते ४३
रोमाङ्कुरोद्गमवति स्तन° ११
लावण्ये परिनिष्ठितं वपु° ६१
लीलोदञ्चितपाणिपल्लवयुगेनो° ४५
वक्त्रस्य प्रतिबिम्ब एव भवतो ७८
वपुर्विभक्तं नवयौवनश्रीः २९
वाच्यां गुम्फैरनुनयपरं १०
विज्ञापयामि कृपणा भवतोऽनवद्या ६९
विनमितवदना पुरो गुरूणां ७०
विरहसमये ध्यानावेशा° ९८
विश्लेषे मदनाभिराम भवतः ६२
वीक्ष्यादर्शे विहितकबरीसंविधाना २८
व्यनामि नयनयुग्मं पक्ष्मपुञ्ज° २२
शून्येऽस्मिन् शयनं भजेति ८९
श्लथा भूयो भूयो भवति ९०
सखि क्रोधावेशादहह ११
सङ्केतदेशं समभिव्रजन्त्याः ४२
संबाधो दयितस्य हन्त ५५
सविनयमनुनीता नागमि १३
सागस्यान्तिकमागते प्रियतमे ८६
सुभग तव कथायां श्रोत्र° ६६
स्कन्धे विन्यस्य सख्याः २४
सुरभा. २८७-३४
स्तनाभ्यां काठिन्यं सुमुखि ५३
स्फुरत्यधरपल्लवश्चलति ५७
हंसालिः कलनादमञ्चति १८
हस्ताग्रेण मुहुः सखीं ३५
हृदयमजहतेव प्रेयसा ४०

Cimanī-carita of Nīlakaṇṭha

CRITICALLY EDITED FOR THE FIRST TIME

By

Professor N. A. Gore, M. A.

Although two manuscripts of the *Cimani-carita* were discovered more than fifty years ago [1] and were lying in the Government Manuscripts Library first at the Deccan College and subsequently at the Bhandarkar O. R. Institute, Poona, the work prominently came to the notice of scholars for the first time only in 1928 when Prof. P. K. Gode, M. A. wrote a short note on it in the Annals of the B. O. R. Institute, Vol. IX, pp. 331-332. In this Note he pointed out that the correct date of composition of this romantic poem was Samvat 1712 i. e. A. D. 1656, and not Samvat 1471 i. e. A. D. 1414 as suggested by Dr. Peterson who emended the words महिस्मुनींद्रद्रुमितेब्दे in the verse (No. 106) at the end of the Ms. discovered by him, [2] to महीमुनींद्र. In 1941, Prof. Gode wrote another Paper [3] on the "Historical Background of the Cimanī-carita" and showed on the testimony of some inscriptions in Nasik and other Persian sources that अलहाविरदीखान (verse 2 etc.) मुखालिस (66, 70) and जाफर (66) mentioned in the Cimanī-carita were historical personages who lived in the Seventeenth Century A. D. In this second Paper, Prof. Gode had announced his intention of publishing the text of this poem in collaboration with his friend Dr. Har Datt Sharma. But unfortunately Dr. Sharma died on 11th September 1942 and the edition could not be published. After some time, Prof. Gode kindly allowed me to edit the poem and secured for me two more Mss. of it. I offer my grateful thanks to Prof. Gode for giving me the opportunity of editing this important literary work.

1 Catalogus Catalogorum II (1896 A. D.)— चीमनीचरित by नीलकण्ठ sont of जनार्दन, Peters 4.26, Extr. 23, Rgb. 357

2. i. e. No. 698 of A Fourth Report of Operations in search of Sk. Mss. April 1886-March 1892, By Prof. P. Peterson, Bombay 1894, p. 26.

3. In The Poona Orientalist Vol. VI (1941), pp. 149-158.

MANUSCRIPT MATERIAL

This edition is based on the following four Mss. and these are the only Mss. of the work known to be extant so far.

A:—No. 3017 in the Anup Sanskrit Library, Bikaner.[1] As the Mss. in the Library are not lent out, a transcript of the original Ms. was used for this edition. Shri K. M. K. Sarma, the Curator of the Library supplies the following description of the original Ms.—Paper; 12 folios; 10 in. X 4 in.; 8 lines per page; Devanāgarī script; old; in good condition; fairly well-written in a large bold hand; the first and last pages left blank except the title which is written on both of them. Some notes by a different hand are found. The title in an abbreviated form viz. चि. च. is written in the left hand in the margin of each page and राम in the right hand one. This Ms. was copied is Samvat 1726 i. e. A. D. 1669-1670 i.e. within fifteen years after the date of composition of the Poem.

B:—[2] Govt. Collection of Mss. at the Bhandarkar O. R. Institute, No 357 of 1884-1887. The Ms. is thus described by Dr. Bhandarkar:—[Paper] No.357. चिमनी .चरितनीलकण्ठ. 8 leaves. 27 lines on each page. 17 letters in each line. Samvat 1764 [i. e. A. D. 1707–1708]. complete. Continuous with अमरुशतक, No. 320. An interesting feature of this Ms. is that unlike the generality of Mss. it is written breadthwise.

C:—[3] Govt. collection of Mss. at the B. O. R. Institute, No. 698 of 1886-1892. According to Dr. Peterson's description it consists of 10 folios 16 lines per page and 40 letters in a line. Samvat 1800 [i. e. 1743–1744 A D.] भावनाविलास in Hindi of हेमराज is the other work in this Ms.

D:—Nāthadvāra Ms. I have used only a transcript of this Ms. No description of the Ms. is available to me.

GROUPING OF MSS.

A careful study of these four Mss. would reveal that they fall into tw

1. Catalogue of the Anup Sk. Lib., Fas. III, Bikaner, 1947, p. 225.

2. Report on the search for Sk. Mss. in the Bom. Pres. during 1884 1887, by Dr. R. G. Bhandarkar, Bombay, 1887, p. 50.

3. A Fourth Report of Operations in search of Sk. Mss.—April 1886 March 1892. By Prof. P. Peterson. Bombay, 1894, p. 26.

groups viz. A, C; and B, D. 1 Though a Ms. in one group at times agrees with those in the other, e. g. वांग-B C D against बँाग of A (39), सीत्कृति—A, B against सीत्कृतं of C, D (8), प्रापत्र्याद्धि-B,C, D against प्रापद्त्र्याद्धि of A (76), the agreement does not disturb the grouping made above.

THE STORY

A muslim nobleman named 'Mukhalisa' had a daughter 'Cimanī' by name. He gave her in marriage to 'Jāphara' the eldest son of his younger brother' Alahaviradīkhāna.' A very handsome young Brahmin named 'Dayādevaśarman' came to Alahaviradikhāna and remained as his protege and was given the work of imparting instruction to the young maidens in the harem like Mānikā and others, and to prevent the growth of undesirable intimacy between the teacher and his fair pupils, one 'Anīsa' was appointed to keep watch over them. But in spite of him, the ladies came under the influence of the charm of their teacher's attractive personality and resorted to various ruses to attract his attention and to get the pleasure of the touch of his hand. Verses 7–15 graphically describe why this tution was bound to fail and verses 16-50 vividly bring out the suffering of the ladies during separation at night from their handsome teacher and their longing to meet him the next day.

One day Cimanī happened to look at Dayādeva from the window of her mansion and she too fell in love with him. With the help of Anīsa who was a willing go-between she secured the 'prāvāraka' or the upper-garment of Dayādeva and Mānikā also agreed to help her and handed

---

· Eg. A, C.	B, D.	No. of stanza
मिलनं	चरितं	6 a
आस्यैः (16) ताभिः (17)	ताभिः (16) आस्यै : (17)	i. e. transposition of two verses.
ज्यौत्स्ना, ज्योत्स्नी	ज्योत्स्ना	29 b
दर्शं दर्शं	दृष्ट्वा दृष्ट्वा	41 d
किं चैतस्मिन्निखिल	किं त्वेतस्मिन्नखिल	49 c
कथमपि तया	कथमपि तुला	52 c
नान्यो	मन्ये	74 a
विप्रा	विप्रो	87 d
ज्ञानं सर्वं	सर्वं ज्ञानं	90 d
रसाश्रयं	रसाश्रितं	102 c

over to Dayādeva the betal containing four pearls which Cimanī gave her for him. Having come to know from Mānikā Cimani's ardent love for himself, Dayādeva, on his part, gave her a necklace of beads of Amber for being conveyed to his beloved. Cimanī then managed to meet Dayādeva in the house of Anīśa and this was a prelude of many such meetings between these young lovers who cared not for the difference of their religious, inequality of their worldly position or the illegitimacy of their love.

APPRECIATION

As this summary will show, the story is a simple one and it develops without a clash of interests or a conflict of contrasted wills. It is a recital of a secret love-affair between the daughter-in-law of a muslim nobleman and a handsome young Brahmin teacher of ladies in the harem. The poem falls into two parts of fifty verses each. The heroine is introduced only in verse 51 and the first part deals exclusively with the attraction of the fair pupils for their fair-looking youthful teacher and their plight in separation from him and is devoted to the development of the 'Vipralambha Śṛṅgāra. In the second part showing the delineation of sambhoga śṛṅgāra also Dayādeva does not take the initiative in the romantic love-affair, though he is quite willing to respond to overtures of love made by the beautiful lady. The lovers in yeilding to the impulse of love do not seem to be worried about the illegitimacy of their love or the fear of the possible consequences that would follow the discovery of their stolen love-affair. The poem is not written to show the punishment that follows illicit love-affair. As remarked by Prof. Gode, [1] "the poem seems to be a true story based on a contemporary love-affair developed in the harem of Allāha Vardī Khān Turkmān."

This plain incident has been made highly interesting by Nīlakaṇṭha by the employment of poetic conceits, figures of speech and a remarkable command over vocabulary and metre. In the very opening verse he brings home to us the qualities of the hero; he was strikingly handsome (see also V. 35) and at the same time very learned. The development of the story to the inevitable result is foreshadowed skilfully in verse[4] (कासौ विप्रः..मियुक्तः।) The tricks of the ladies to attract the attention of their teacher are cleverly described. He pretended punish them but was himself claimed as his victim by god of Love (v. 10). The comparison of the ladies in love, free from mutual jealousies to a 'Jīvan mukta' is stricking because it is so unexpected. The description of the plight

1. Prof. Gode, "Historical Back ground of Cimanī-Carita," Poona Orientlist, VI, 154.

of the ladies in separation is given in the usual manner. The correct use of संप्रयोग in V.24 and the श्लेष on जल in V. 27 should be noted. The poetic fancy on the spot of the moon is striking on account of its freshness. In their separation the ladies cannot even place their lover in their heart for it is heated by the scorching rays of the moon from without and pierced by the arrows of cupid. Fortunate indeed are the lotuses who can hold their lover the bee close to their heart and cover him up with their arms in the form of their petals (V. 32). The mythological account of the Vindhya growing up to block the way of the sun is alluded to in V. 34. The use of the words बाँग in V. 39, of अंबर in V. 71 and हिंदू and मह्लिश in V. 86 deserves notice. The poetic conceit on the crest of the cock is very interesting and original. The alliteration in vv. 44, 45 and 46 cd is very apt as it is used to echo the cawing of the crows. The practice of giving the ताम्बूलवीटी or वीटी at the beginning and the end of the lesson should be noted (vv. 49 and 21 respectively); v. 50 mentions चेतोजनुरुपनिषत् as leading to जावन्मुक्ति। The conversation between Cimanī and Anīsa in vv. 57, 58 and between Cimanī and Mānikā in v v. 63-65 is skilfully handled. The vv. 90 and 91 are based on the implied comparison of the स्तन with the शिव. (For a similar idea cf. स्वयंभूः शम्भरम्भोजलोचने त्वत्पयोधरः। नखेन कस्य धन्यस्य चन्द्रचूडो भविष्यति ॥ सुभाषितरत्नभाण्डागार, 6th ed. p. 277, v. 250). The वामा नीतिः of काम is well described in v. 96. The description of the निधुवन क्रीडा in terms of a sacrifice is quite original. Thus the poet has successfully delineated the sentiment of Love and his claim that not a sentence in this Cimanīcarita is devoid of 'rasa' is quite justified and he deserves great credit for having created such an interesting poem art of a simple incident of a secret love-affair.

METRICAL ANALYSIS

The one hundred and six verses in this poem are written in nine different metres of which the *Mandākrāntā* is the dominant one; the first 96 stanzas are in this metre. All the metres of the *Cimanī-carita* are indicated below in the alphabetical order and the numbers of the verses which are written in them are shown in brackets just after them.

उद्गीति (106)	मालिनी (101)
उपगीति (104, 105)	वसन्ततिलका (103)
मन्दाक्रान्ता (1-96)	वियोगिनी (102)

शार्दूलविक्रीडित (97)
शिखरिणी (98, 99)
हारिणी (100)

THE DATE OF THE POEM

Nilakantha has himself furnished the exact date of composition of the poem in the concluding stanza, viz.—

मिहिरमुनीन्दुमितेऽब्देऽतिक्रान्ते विक्रमादित्यात् ।
शिवरात्रौ शिवपदयोर्निजकृतिराधायि नीलकण्ठेन ॥

Now मिहिर= the sun = 12;मुनि = 7 and इन्दु = 1 and following the rule अङ्कानां वामतो गतिः we get Samvat 1712 as the date of composition corresponding [1] to A. D.1655. The poet that he dedicated the poem to Śiva on the Śivaratri day it is reasonable to believe that he finished it on that day and placed it at the feet of Śiva on the same day, before showing it to others or to use modern terminology, before anouncing its publication to others. This would give us the exact day and the month of its composition.

THE AUTHOR AND HIS WORKS

From vv. 104 and 105, we get the following information about our author.

Nilakantha's surname was Śukla and he was the son of Janārdana and Hirā, [2] who was a daughter of one Vatsacārya. In poetics or Alaṅkāra-

1. When a work is written in or after Kārtika it is more correct to deduct 57 from the Samvat year to get the corresponding year in Christian Era.

2 Cf. शुक्लजनार्दनपुत्रो वत्साचार्यस्य दौहित्रः ।
अभ्यस्तशब्दशास्त्रः भट्टोजिदीक्षितछात्रः ॥१॥
.... महसि प्राप्तनिजजन्मा ।
...... शैवः ॥

शिवरात्रौ शिवपदयोर्निजकृतिराधायि नीलकण्ठेन ।

In the colophon of शब्दशोभा (B. O. R. I. Ms. No. 183 of 1882-1883) Quoted from Prof. Gode's Paper on Bhaṭṭoji Dīkṣita, Annals of Sri Ver O. Inst. Tirupati, Vol. 1, p. 122.

śastra he was a pupil of Bhaṭṭa Śri Maṇḍana and in Grammar of Bhaṭṭoji Dīkṣita. In the Colophon to the शब्दशोभा he calls himself a शैव and both the चिमनीचरित and the शब्दशोभा were dedicated to Śiva on the शिवरात्रि-day from which it is evident that he was an ardent devotee of Lord Śiva. From v. 103 of the चिमनीचरित it appears that he was a great admirer of भवभूति.

So far we know only two works of Nīlakaṇṭha viz., The Cimanīcarita and the Śabdaśobha. But the anthology Sabhyālaṅkaraṇa of Govindajit quotes [1] 10 verses from our author out of which only one verse is from the Cimanīcarita (no. 99). The remaining nine verses must have been taken either from the Śabdaśobhā or other works of our author.

The Śabdaśobhā was composed [2] in 1637 A. D. and the Cimanī-Carita in A. D. 1655. Therefore 1630-1660 A. D. may be tentatively fixed as the period of literary activity of our poet.



1. Prof. Gode, Date of Sabhyālaṅkaraṇa etc., New Ind. Ant. Vol. IV (1942). 366-369.
2. See Prof. Gode's Paper on Bhaṭṭoji Dīkṣita referred to above.



नीलकण्ठकविकल्पितं

चिमनीचरितम् ।

आसीदाशीर्वचनविषयः पश्यतामाननाब्जं
सौन्दर्यान्तःकरणमवनीकौतुकं काव्यतत्त्वम् ।
स्फूर्तेर्मूर्तिर्मदनमहिमा भारतीभागधेयं
क्रीडास्थानं रसिकमनसां श्रीदयादेवशर्मा ॥१॥

चेतोवृन्दान्यलहविरदीखानसीमन्तिनीनां
यस्मिन्नग्नौ शलभकुलवद्भेजिरे झम्पपातान् ।
बिभ्राणो यः किमपि ललितं लोचनालेह्यमोजः
स्त्रीणामासीदवनिवलये मोहनो मोहिनीनाम्[1] ॥२॥

सोऽयं दैवादलहविरदीखाननामानमेत्य[2]
म्लेच्छाधीशं प्रकटितगुणः स्वीचकारश्च[3] वृत्तिम् ।
तत्राप्येष स्मरसहचरे वर्तमानो वयस्य-
प्युद्युक्तोऽन्तःपुरमृगदृशां पाठनस्याधिकारे ॥३॥

क्वासौ विप्रः क्व च परिचयोऽन्तःपुरस्त्रीषु[4] योऽयं
नीरूपाणां गलितवयसां युक्तउक्तोऽभियुक्तैः ।
इत्यज्ञानादपरिगणयन् म्लेच्छराजोन्वजाना-
देतत्पार्श्वे पठितुमनिशं मानिकाद्या नताङ्गीः[5] ॥४॥

1. C. मोहनीनां. This form is correct acc. to Apte's
Prac. Sk. Dic.

2. B. अलहबिरदी for अलहविरदी

3. C. स्वीचकारान्ववृत्तिं (mislection for स्वीचकारात्मवृत्तिं ?)

4. A om. योऽयं.

5. B, C, D. नताङ्गी (C मानिकानतांगी). But this is obviously a mistake in view of मानिकाद्या in this stz. and तासां and आसां in stzs. 5 and 6 respectively.

तादृक् तासां रहसि मिलनं तादृशी रूपसंपत्
तादृग्वेषो[1] विलसितमहो यौवनस्यापि तादृक्।
तादृग्विप्रो गुरुरयमथाध्यापनं तादृशं चे-
त्येषां[2] किंस्वित् कुसुमधनुषः कार्यसिद्धिं न कुर्यात् ॥५॥

एतेनासां रहसि[3] मिलनं किञ्चिदन्यादृशं भू-
न्मास्मिन् कृत्येऽस्यधिकृत इति त्वं भवेः सावधानः।
आभाष्यैवं यवनपतिनानीशनामा नियुक्तः
क्लीबस्तासां पठनसमये पार्श्वे आसांबभूव ॥६॥

पाणिस्पर्शो लिखनसमये तेन किं वारणीयो
वर्णोच्चारे वदनकमलालोकनं किं निवार्यम्।
किं वा काव्यादभिमतविधेर्बोधनं शोधनीयं
कृत्येऽनीशः समजनि निजे सर्वतोऽनीश एव ॥७॥

काचित् कम्पं वपुषि दधती सीत्कृतिं[4] चाधरोष्ठे
हृष्यद्रोमण्यपि करतलं गोचरे ताडनस्य।
वर्णोच्चारे विसदृशि कृते[5] कातराक्षी विनेतु-
र्न व्यातेने किमिव कुतुकं यष्टिकोन्नामनेषु ॥८॥

भूयोभूयः प्रियतमकरस्पर्शनानन्दलाभं
काङ्क्षन्ती[6] काव्यलिखदयथावल्लिपिं कैतवेन।
ज्ञातेऽथास्याः कपटलिखने तस्य पाणावकस्मा-
ज्जातः कम्पोऽजनयत पुनर्लेखनेऽप्यन्यथात्वम् ॥९॥

यष्टिर्यावद्व्यरचि गुरुणा नोन्नता[7] सन्नताङ्ग्या-
स्तावत्कामः समुदनमयद् भ्रूलताचापयष्टिम्।
किञ्चास्राम्भः कणविलुलितैः कातरैरक्षिपातै-
र्बाणव्रातैरयमतनुना ताडितः प्रत्युताहो ॥१०॥

---

1. D. तादृग्वेशो.
2. B. किंचित्. चेत् येषां A. चेदेषां C.
3. B. D. चरितं.
4. C. D. सीत्कृतं।
5. D. विसदृशकृते।
6. C. काम्यन्ती.
7 D. नोन्नतं.

किंस्विन्नव्ये वयसि गुरुनामागतस्यास्य कुर्युः
कार्यं नानाविलसितमये मीनकेतोर्नियोगम् ।
किं वा नीलोत्पलदलदृशो वर्धमानाग्रहस्ताः
शिक्षां तस्याक्षरपरिचये मानयेयुर्विनेतुः ॥११॥

कस्या शक्तिः सरसिजदृशां पाठने तस्य तिष्ठेत्
तिष्ठेयुर्वा कथमवहितास्तास्तदीये नियोगे ।
लग्नैरन्तर्मनसमनिशं यस्य यासां विलासै-
र्हा धिक्कष्टं पठनमखिलं स्वीयमेव प्रणष्टम् ॥ १२ ॥

तेनैतासामसति पठने किं नु शिक्षा विधेया
किं वा केनाप्यहह गुरुणा तस्य शिक्षा विधेया ।
योऽसौ यासा[1] रहसि चरितैस्तादृशैस्तामवस्थां
नीतो यस्यां यवननृपतेरप्यभून्निर्भयोऽयम् ॥१३॥

भाषाकाव्यं यवनयुवतीः[2] पाठयामास विप्र-
स्तस्यार्थं तु स्वयमभिनयैर्व्यञ्जयामासुरेताः ।
तासां ज्ञानं किमपि गुरुतः काव्यजातस्य जातं
विज्ञानं तु स्मरसहचराद्यौवनात् प्रादुरासीत् ॥१४॥

तासां तादृक् प्रणयिनि मनो मग्नमासीद्यथैता
अन्योन्येर्ष्यामलिनमनसो नो मनागप्यभूवन् ।
जीवन्मुक्ता इव किमपि या नात्मवृत्तं व्यजान-
न्नेतासां वा कथमवगतं स्यात् सपत्नीचरित्रम् ॥१५॥

[3]आस्यैरासामहनि मुमुदे किं च मम्ले निशायां
नैतच्चित्रं स हि[4] जलरुहां जातिसिद्धः स्वभावः ।
चित्रं तत् तु स्फुरति दिवसे मित्रमालोक्य नेत्रा-
ण्युत्फुल्लानि, व्यवहृतिरियं नैव नीलोत्पलानाम् ॥१६॥

ताभिस्तेनाप्यसति मिलनेऽनेकयामा त्रियामा
कोकद्वन्द्वैरिव न कथमप्यन्तमानीयते स्म ।
किं चोदञ्चद्बहुविधसुखे सङ्गमे वासरोऽपि
द्रागेवैकः क्षण इव गतः कुत्र न ज्ञायते स्म ॥१७॥

---

1. B. वासां
2. A. युवतीं (That this is a mislection for युवतीः is proved by एताः and तासां in this very stz.)
3. B, D.– stzs. 16 (आस्यैरासा०) and 17 (ताभिस्तेना०) are transposed in B and D.
4. A. ह.

मासं नक्ताशननियमिनां मासि तस्मिन्नराणां
प्राजापत्यं दिनमिव दिनं दीर्घमासीद्यदेव ।
पश्यन्तीनां प्रियतममुखं साभिलाषं निमेषा-
देकस्मादप्यहह तनुतामेतदेव प्रपेदे ॥१८॥

नानध्यायादधिकमपरं वासरं सौख्यहेतुः
शिष्याणां स्यादिह यदभियः खेलनं ते भजन्ते ।
आसीत्[1] प्रेयोविरहहुतभुग्ज्वालजालावृताना-
मेतासां तु प्रलयदिवसो[2] नापरः कोऽपि तस्मात् ॥१९॥

दातुं[3] वीटीं पुर इव कृतो यावदेवाग्रहस्त-
स्तावत् पश्चादहह विरहाशङ्कयाकृष्यते स्म ।
हा धिग्यातेऽप्यहनि गुरुणा प्रार्थ्यमाने विदाये
तन्व्या वीटीवितरणविधिर्नाध्यगच्छत् समाप्तिम् ॥२०॥

तापस्तादृग्वपुषि विपुलः[4] प्रादुरासीदकस्मा-
दुद्वेलत्वं पुनरुपययौ चक्षुषोर्बाष्पपूरः ।
किं च श्वासोऽप्यजनि कुचयोः कम्पहेतुर्वधूनां
वीटीदानावसर उदभूत् कोऽपि कल्पान्तकल्पः ॥२१॥

[5]काचिन्मूर्च्छापगमसमये व्योमनीन्दुं निरीक्ष्य
प्रोवाचेति प्रियसखि कुतः प्रातरेव प्रबोध्य ।
नीता नाहं दयितमविधे धिग्दिनार्धं प्रयातं
दिष्ट्या[6] दृष्ट्या पुनरपि पुरो दृश्यते पश्य भानुः ॥२२॥

कोकः कोकीमिव कविवरस्त्वामसावेत्य सद्यः
प्रातःकाले पुनरपि समाश्वासयिष्यत्यवश्यम् ।
सख्येत्युक्ते वचसि सहसोत्थाय जाताभिलाषं
तन्व्या दृष्टिर्दिशि सुरपतेः प्रेषितानेकवारम् ॥२३॥

1. D. transposes आसीत्० and एतासां० i. e. 19c and 19 d.

2. B, D. समयो.

3. B. कर्तुं.

4. B वहुल (mislection for बहुलः)

5. B Stz. 22 is wrongly numbered as 23, and this mistake persists upto stz. 96, number 96 occurring twice.

6. D. दिष्ट्या दिष्ट्या

कोकस्त्रीणां दयितविरहः केवलं दुःखहेतुः
सोढव्यस्ताः कथमिव समा मादृशीभिर्भवेयुः ।
हा धिग्यासां यवनपतिना संप्रयोगो निशायां
सोढव्योऽयं प्रियसखि पुनर्विप्रयोगः प्रियेण ॥२४॥

नानध्याये यदि परिणमेदन्यथात्वं दिनानां
दध्युः सर्वाण्यपि ननु तदैतानि हैमन्तिकत्वम् ।
आयामिन्यो यदि च नितरां नो रजन्यो भवेयुः
संबन्धिन्यः सहचरि तदैता अपि स्युस्तपर्तोः ॥२५॥

रात्रौ रात्रावुदयमयतेऽस्मासु तापं वितन्वन्
मूर्खः ख्यातं त्रिजगति निजं यः कलङ्कं करोति ।
[1]आविष्कुर्वन् कतिपयकलाः शुक्लपक्षाश्रयेणा-
सावप्येको द्विजपतिरभूत् पश्यताभाग्ययोगम् ॥२६॥

यासां जन्मप्रभृति मिलनं जायमानं जलौघै-
स्ताभिः प्राप्यः प्रियसखि पुनः कुत्र चातुर्ययोगः ।
पश्येदानीमहह शशिनस्ताप्यमाना मयूखै-
रालोक्यास्मान् प्रहसितमुखाः कैरविण्यो भवन्ति॥२७॥

संवर्ताग्निः सितरुचिरसावस्य ताराः स्फुलिङ्गा
धूमव्यूहो गगनमभितो दिग्विभागान् प्रसर्पन् ।
ज्योत्स्ना ज्वालापटलमनिलो विप्रयोगः सहायो
हा धिग्दाह्यास्तृणमिव वयं निर्दयं दैवमीदृक् ॥२८॥

सोढव्योऽयं दयितविरहः सोऽपि चैत्रक्षपायां
साऽपि ज्योत्स्ना,[2] रजनिपतिना साऽपि पूर्णेन युक्ता ।
क्रोधेनेद्धः प्रियसखि पुनः सोऽपि सोऽप्यस्मदीय-
प्रेयः श्रीमन्मुखविहितयावज्ञया जायमानः ॥२९॥

केनापीन्दोर्हृदयमदयं हन्त निष्कृष्य नीतं
तस्मादेव स्फुरति गगनं मध्यभागेऽस्य रिक्तं ।
यच्चैतस्मिन् हृदयरहिते नास्ति कारुण्यमीषत्
तेनैवेन्दुर्व्यथयातितरां मादृशीः क्रूरकर्मा ॥३०॥

1 A एषोप्येक [:] कतिपयकलाः शुक्लपक्षाश्रयेण प्रादुः कुर्वन् ... योगम् I i. e. opening words of 3rd and 4th are transposed with a change of reading.

2. A. ज्यौत्स्ना; C ज्योत्स्नी.

का का जीवत्यतनुविशिखैर्हन्त का का न विद्धा
का कोत्कीर्णा विषमसमयं ध्यानयुग्योगिनीव ।
एतान् प्रश्नान् प्रकटितकृपोऽस्मासु नूनं चिकीर्षुः
काकेत्येतद्वदति पुरतो व्यक्तमास्येन[1] काकः ॥४५॥

कालाधीना स्फुरति विविधा वस्तुशक्तिस्तथाहि
प्रादुर्भूतो दिवसविलये दुःखहेतुर्य एव ।
कर्तुं पूर्णां प्रियसखि मनःकामनां कल्पते नः
कल्योत्पन्नः किल कलकलः कालविङ्कः स एव ॥४६॥

आविष्कुर्वन्नुदयशिखरेऽवस्थितं भानुमन्तं
प्राणप्रेष्ठं प्रियसखि निजादालयात् प्रस्थितं च ।
आनन्दं मे वितरति तथा तूर्यनादो यथासी-
च्छब्दो ब्रह्मेत्यभिमतमिदं शाब्दिकानां मतं मे ॥४७॥

इत्येतासां दयितविरहव्याकुलायां दशायां
वाचस्तापातिशयपिशुनाः प्रादुरासन्निशायाम् ।
प्रातःकृत्यं त्वरितमथ ताः संविधायाध्यगच्छ-
न्नध्यायस्यालयमधिगतं पूर्वमेव प्रियेण ॥४८॥

पायं पायं प्रियतममुखं ताः सुखं तादृगापु-
स्तासां येन ध्रुवमनुभवेऽप्याविरासीत् प्रमोहः ।
किं[2] चैतस्मिन्नखिलकरणान्यर्पयन्ति स्म पूर्वं
पश्चादेताः किल करतले तस्य ताम्बूलवीटीः ॥४९॥

यादृग्दुःखं निशि मृगदृशः प्रेयसो विप्रयोगे
तादृक् तेनाहनि मिलनतः सौख्यमप्यन्वभूवन् ।
किं ताश्चेतोऽननुरूपनिपत्तत्त्वबोधादवाप्ता
जीवन्मुक्तिं तदिति विदधुर्दुःखसौख्ये समाने ॥५०॥

यासावासीदल[3]हविरदीज्येष्ठबन्धोस्तनूजा
भार्यात्वं चाप्यलहविरदीज्येष्ठसूनोरयासीत् ।

1. A.D. वक्तुमीष्टेन[?].C वक्तुमीच्छेन. B व्यक्युमाषेन. On the strength of the reading in B, the emendation व्यक्तमास्येन is made.

2. B. D. किं त्वेतस्मिन्निखिल० (D. किन्त्वै for किंत्वे is a scribal error).

3. B, ०द्लहबिरदी०

याता ख्यातिं जगति चिमनीत्याख्यया या गवाक्षे
[1]दैवादेशात् क्वचिदथ दयादेवमेषा ददर्श ॥५१॥

दर्शं दर्शं द्विजवरमुखं सा सुखं प्राप तादृग् [2]
नूनं यादृक् त्रिदशसुदृशां दुर्लभं नन्दने[3]ऽपि ।
किं चैतासां कथमपि[4] तया नो तुला स्यात् तदीये
चेन्नस्यातामहह नयने निर्निमेषे तदानीम् ॥५२॥

चेतश्चेतोभवपरिभवं देहदीप्त्या दधाने
तस्मिन् विस्मापितदृशि समाधाय तस्मादवाप ।
द्वेषं पत्यौ विषमविशिखेऽधीनतां पीनतां च
श्वासोल्लासे[5] वपुषि कृशतां पाण्डुतामानने सा ॥५३॥

यः प्रावारः क्षितिसुरवरप्रावृतो दृष्टपूर्वो
ऽनीशेनांसोपरिविनिहितं तं निरीक्ष्यायताक्षी ।
आदाय स्वे वपुषि विरहोष्मबुधं प्रावृतेन
प्रावारेण प्रशममनयत् पश्यताहो विचित्रम् ॥५४॥

प्रावारोऽयं परिमलभृतः श्लाघनीयोऽतिमात्रं
गात्रे पूर्वं कथय कृतिनः कस्य लग्नस्तयेति ।
पृष्टेनान्तःपुरिकपतिनेत्येतदूचे वचस्त-
द्वाचोयुक्तावधिगतवता व्यञ्जनागम्यमर्थम् ॥५५॥

[6]योऽसावन्तःपुरमृगदृशां पाठनस्याधिकारे
विप्रो विप्राधिपमुखि दयादेवनामा नियुक्तः ।
प्रावारेऽस्मिन् परिमल[7]भरस्तत्परिष्वङ्गलब्धो
लब्धव्यो वा भुवि परिमलस्तादृशोऽन्यत्र कुत्र ॥५६॥

1. B. C. देवादे०　　2. A, B, C, D. तादृक् नूनं
3 D. मन्यतेऽपि

4 B. तुला नेतया स्यात्वदीये [त्वदीये should be त्तदीये].
D तुला नो तदास्यात्तदीये [तदा should be तया as
तदानीम् occurs at the end of the fourth line.]

5. D श्वासोच्छ्वासे.

6. For अन्तःपुर......धिकारे Cf. 3d above.

7. C. परिमलरसः.

देह्येनं मे विधुमुखि मया दत्त एवास्ति यस्य
प्रावारोऽयं यं किमुत भवताप्रच्छयसौ[1] पृष्ट एव ।
इत्यन्योऽन्यं वचनरचनैवानयोर्दूतकृत्या-
शङ्कातङ्कापनयनमकरोन्निष्प्रयत्नप्रवृत्ता ॥५७॥

रागो यातः क्व तव वदनात् पाण्डुतामादधाना-
ज्ज्ञानास्त्येनं न मम हृदये रागमायातमद्य ।
किंस्विद्दृष्टो द्विजपतिरयं लोचने मे कृतार्थे
जाते जन्म त्विदमथ कृतार्थं विधेयं त्वयैव ॥५८॥

इत्याज्ञप्ते यवनसुदृशाऽन्येद्युरेष द्विजं तं
प्राप्योदन्तं विदितमकरोत् तत्पुरस्तात् समस्तम् ।
सौभाग्येऽस्मिन् विलसति पुनः कर्णयोस्तस्य दृग्भ्या-
मीर्षादोषादजनि किमु तां द्रष्टुमुत्कण्ठिताभ्याम् ॥५९

अध्यासीनः सरसिजदृशां मध्यमध्यापनाया-
नीशेनासामनवकलितं पस्पृशे पाणिनासौ ।
संज्ञामेतामवगतवतस्तस्य दृक्तिक्तटेषु
भ्राम्यन्ती द्राक् कलयति[2] कलानाथमाराद्गवाक्षे ॥६०

दृष्टिस्तस्य क्षणमनु वधूत्फुल्लवक्त्राम्बुजात-
व्रातं यान्ती क्षणमथ तदीये मुखेन्दौ प्रयान्ती[3] ।
भाति स्मेन्दौ सति[4] विकसितान्याम्बुजातानि जाता-
न्येवं मत्वातिशयविलसद्विस्मयव्याकुलेव ॥६१॥

सक्तं बिम्बाधररुचि भवेदेव चेतोऽस्य रक्तं
नैतच्चित्रं विलसतितरां किन्तु चित्रं तदेतत् ।
गण्डे पाण्डुच्छविजुषि परिष्वङ्गमासाद्य तस्या
विप्रस्यान्तःकरणमभजद्रागमत्यन्तमेव ॥६२॥

अद्याधीषे किमपि चरितं दूतिकानामधीये
किंस्वित् सार्थं पठसि तदहो पठ्यते सार्थमेव ।

1. A. B. C. D. भवतापृच्छयसौ (B ०पृच्छ०).

2. A, C, D. द्रागकलयत but this is metrically defective. B द्राग् कलयाति.

3. C. प्रयाता. 4. B, C. स्मेन्दौ सितविकासिता०

[1] जानासीह प्रियसखि किमु[2] व्यञ्जनागम्यमर्थं
जानाम्येनं क्वचिदपि विधौ काङ्क्ष्यते किं त्वयैषः ॥६३॥

मा शङ्किष्ठाः किमपि मयि तज्जीवितं मे त्वदीयं
शङ्के नाहं कथमिव भवज्जीवितेशाभिलाषे ।
किं ते यातः क्वचिदपि [3]दृशां गोचरे विप्रवर्यो
ज्ञातं तार्हि त्वदभिलषितं स्वल्पमत्यन्तमेव । ॥६४॥

मा कार्पण्यं कुरु कुरु पदं दानशौण्डोत्तमाङ्के-
ष्वेतां कीर्तिं कलय कलिता या न विद्याधरेण ।
प्रेयान्नक्तं तव मम दिवेत्येतदङ्गीकरोषि
त्वं चेद्दूत्यं तव खलु तदाङ्गीकरोम्येवमस्तु ॥६५॥

इत्थं प्रश्नोत्तरवति रहोवाग्विलासे प्रवृत्ते
कृत्वा सार्धं मुखलिसभुवा[4] मानिकोति प्रतिज्ञाम् ।
प्रत्तां वीटीं द्विजपतिकृते सा तयाथो गृहीत्वा
मुक्तागर्भां निजगृहमगादालयाज्जाफरीयात्[5] ॥६६॥ कालापकम् ।

विटी वक्त्रं सदापि भवतश्चुम्बितुं नैव योग्या
यस्मादेषा वयमिव चमत्कारमन्तर्बिभर्ति ।
प्रत्यक्षं ते विरहजनितां पाण्डुतामज्झतीयं
तेनैव त्वत्करतलपरिष्वङ्गमासाद्य सद्यः ॥६७॥

प्रातः प्राप्ता परिषदि सहाध्यायिनीनां वधूनां
दत्वा वीटीं क्षितिसुरामिति प्रत्यवोचद्वचः सा ।
विज्ञायान्तर्मनसमयमप्यस्य किञ्चिद्रहस्यं
नोपायुङ्क्त स्त्रियमिव रहो भोक्तुमेनामियेष ॥६८॥ युग्मम् ।

---

1. Marginal note in A-'इह' दूतिकाचरितं, व्यञ्जनागम्योऽर्थो वाच्यलक्ष्य (Ms ०लक्षा०) भ्यामन्यः। 'इह' मद्वचासि, व्यञ्जनागम्योऽर्थोऽर्थशब्दस्य प्रयोजनरूपः। सख्या तु प्रयोजनार्थतां सार्थमित्यत्र स्थितस्यार्थशब्दस्य व्यञ्जनयावधार्य प्रत्युत्तरितमेष इति ।

2. For व्यञ्जनागम्यमर्थं Cf. 55d above.

3. C दृशां गोचरे.

4. Marginal gloss in A— मुखलिसश्चिमनीतातः ।

5. Marginal gloss in A— जाफरश्चिमनीपातिः ।

ख्याताहिभ्यो जनिरिह पुनर्नाहिवल्लीदलेभ्यो[1]
मुक्तानामित्यत इव परं विस्मयं बिभ्रदन्तः ।
उत्कील्य स्वं गृहमुपगतो वीटिकां तामपश्यत्
ताराकाराः क्षितिसुरपतिस्तत्र मुक्ताश्चतस्रः ॥६९॥

आलापो यो मुखलिसभुवा सार्धमासीत्तमेनं
प्राप्यैकान्ते कविमकथयत् साथ मुक्तार्पणान्तम् ।
इत्युत्युक्ता परहितकृते मानमुक्तेऽपि कृत्ये
सर्वासामप्यलभत ततो मानिकातीव मानम् ॥७०॥

गन्धद्रव्याद्यवनविषयेष्वम्बरेति प्रसिद्धा-
द्वद्वैरक्षैः समुपरचितां मालिकां कण्ठदेशात्
उत्तार्याधादधिकरतलं मानिकायाः स विप्रः
क्षिप्रं सापि प्रियसहचरीपाणिमेनामनैषीत् ॥७१॥

मूर्धन्याधादथ हृदि ततः पुञ्जितोष्ठे मुखेऽथो
पक्ष्मण्यक्ष्णोरलिकफलके गण्डयोर्मण्डले च ।
पायं पायं तदनु सुचिरं पाणिगामेव बाला
मालामेनां कथमपि निजे स्थापयामास कण्ठे ॥७२॥

तस्या देहे विरहदहनो मालया साधु शान्तिं
नीतो नो चेत् क्षणमपि तया स्थातुमस्मिन्न शक्यम् ।
स्यादुद्योगो यदि गुणवतामात्मनोऽर्थे कदाचित्
सोऽपि प्रायोऽपनयति परीतापमेवं[2] परेषाम् ॥७३॥

नान्यो[3] धन्यस्त्रिभुवनतले त्वादृशोऽनीश यस्मि-
न्नेकोऽपीषुः कुसुमधनुषो नैव लग्नः कदापि ।
तेनैव त्वं कलयसि मनागप्यहो न व्यथां मे
नोचेदद्याप्यपनयविधौ नोद्यतः स्याः किमस्याः ॥७४॥

इत्युक्तोऽसौ रहसि सुदृशा सद्म यातस्तदीयं
तामित्यूचे विधुमुखि मनाग्धैर्यमाधाहि चित्ते ।
यातु प्रान्तं दिनमिदमथायुष्मती जीवितेशं
प्राप्स्यत्येव प्रहरविरतौ मद्गृहान्तर्निषण्णम् ॥७५॥

---

1. Marginal gloss in A— करीन्द्रजीमूतवराहशङ्खमत्स्या-
हिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके तेषां
तु शुक्त्युद्भवमेव भूरि ॥

2. B ०तापमेवापषां (=०तापमेवापरेषां) 3. B, D मन्ये.

श्रुत्वाऽनीशोदितमिति वचो विस्मरन्ती मुहूर्तं
सर्वामार्तिं सपदि परमानन्दमग्ना बभूव ।
पश्चादस्या दयितमिलनोत्कण्ठया सार्धमेव
प्रापाद्वृद्धिं प्रतिपलमहो वासरोऽपि प्रकामम् ॥७६॥

गच्छानीश स्वसदनमिदं त्वद्वचो मान्यथा भूत्
पातुं प्राणान् मम यदि तवाकाङ्क्ष्यते चित्तवृत्त्या ।
नोचेदेषां क्षणविलसितं[1] ज्ञायमानं[2] तदेत-
द्दीपस्येवोपरमसमये नायतौ श्लाघनयिम् ॥७७॥

प्राप्यानुज्ञामिति मृगदृशो वेश्म यातः स्वकीयं
यावच्चिन्तां रचयति हृदि द्रष्टुमेष द्विजेन्द्रम् ।
अस्य प्राप्तो नयनविषयं तावदेवात्मनासौ
पूर्तिं चिन्तामणिमधरयंश्चिन्तितानां चकार ॥७८॥

सम्यग्जातं स्मरणसमये यत् समासादितोऽसि
स्वान्तं मेऽद्य स्पृहयति सखे सारिकाखेलनाय ।
किञ्चैतस्मात् सुविदितमिदं तेऽस्तु यन्मामकीनात्
स्वान्तादेकं क्षणमपि तवावस्थितिर्नेतरत्र ॥७९॥

उक्त्वेति प्रारभत कविना क्रीडनं तेन सार्धं
क्लीबः किञ्चिन्न पुनरवदत् तं चिमन्या उदन्तम् ।
हन्तैतावत्समयनयने ज्ञातसङ्केतवार्तो
मार्तिं यासीदयमिति दयावान् दयादेव एव ॥८०॥

एवं [3]क्रीडाव्यवहितहृदयो वासरं न व्यजाना-
द्यातं यान्तीं कथमिव पुनर्वेत्ति सन्ध्यां स विप्रः ।
गच्छन् म्लेच्छीं त्यजति तु पुरा मामयं तत् त्यजेयं
कस्मान्नैनं[4] ध्रुवमिति धिया सान्ध्यकर्मात्यजत् तम् ॥८१

व्यासङ्गेऽस्मिन् विलसति तयो[5]र्यात एको रजन्या
यामोऽप्यन्यादृशमिह पुनः किञ्चिदासीन्न चेतः ।
सेयं क्रीडा जगति जयताद्यत्प्रसादादकस्मात्
प्रापाद्विप्रो यवनदुहितुः सङ्गमस्यावधिं सः ॥८२॥

---

1. B, C, D विलसनं   2. B, C, D जायमानं

3. B ०विहित०   4. B ०न्नैतं

5. C याति, D जातः for यातः

*

सापि प्राणाधिपतिमिलनस्यावधेः पूर्तिहेता-[1]
वम्भोजाक्षी भजति समये सन्निधिं सावधाना ।
नत्वा द्वित्राः सह सहचरीः सत्वरं संप्रतस्थे
सद्मानीशं प्रति निजगतिं विस्मरन्ती स्मरार्ता ॥८३॥

अन्तर्दत्तार्गलमथ गृहद्वारमाराद्विभाव्य
स्वनैवातित्वरितमररं[2] पाणिनाताडयत् सा ।
तेनैतस्मिन् ध्वनिरुद्भवद्यः स सर्वेन्द्रियेभ्य[3]-
श्चेतोवृत्तिं युगपदुभयोः कर्ण एवाचकर्ष ॥८४॥

क्लीबः क्रीडां सपदि स परित्यज्य जप्यामपि स्वां
चक्रे द्वारं विवृतमुभयोर्भागधेयः सहैव ।
प्रागामादौ तत इव बहिर्निर्गमान्तः प्रवेशौ
पश्चादन्तःपुरिकयवनाधीशवध्वावयाताम् ॥८५॥

हस्तेनास्य[4] द्रुतमथकटीबन्धनं संदधाना
निर्गच्छन्तं बहिरिति महालेखमेषा बभाषे ।
हिन्दूकाद्य व्रजसि हृदयं कुत्र मे चोरयित्वा
लब्धाऽसि त्वं कथमपि मया मृग्यमाणश्चिरेण ॥८६॥

विप्रोऽहं तत् प्रणयपदवीं तेऽधिगन्तुं न योग्यो
मैवं ब्रूयाः पुनरपि सखे योग्य एवासि यस्मात् ।
त्वन्माधुर्यं यदवधि मनो मग्नमासीन्ममास[5]
विप्राहं[6] तत्प्रभृति पुरतः पश्य यज्ञोपवीतम् ॥८७॥

इत्यौत्सुक्यातिशयवशतो विस्मरन्त्यौचितीं स्व[7]
भावाकूतं प्रथममिलने पातुमेवाप्रगल्भा ।
दूरीकृत्यारसिजशिखरादुत्तरीयाञ्चलं सा
तिर्यङ्न्यस्तामुरसि दयितं दर्शयामास मालाम् ॥८८॥

1. A ०हेतौ अंभो०
2. Marginal gloss in A—कपाटमररमित्यमरः ।
3. A, B सर्वेंद्रियेभ्यः चेतो०
4. B हस्तनाथ. But as B has द्रुतमथ०, the first अथ after हस्तेन is a palpable mistake.
5. C ममाहं संविप्रा तत्प्रभृति.
6. B, D विप्रोहं
7. A, B, C, D स्वां. There is no cogency in connecting स्व with औचिती, 'Her own propriety.' But स्व improves the sense when it is connected with भावाकूत. स्वं was probably changed into स्वां through the proximity of औचितीं.

पश्यत्येष स्तनमतनुना प्रेरितः किं नु किं वा
मालामम्भोरुहदलदृशा पश्यति प्रेर्यमाणः ।
किञ्चैतस्यां यदभिलषितं दर्शितायां तयासीत्
सिद्धिं निन्ये तदखिलमहो दृश्यमानः स्तनोऽस्याः ॥८९

ज्ञानं रुद्रे रचयति रतिं यः स विन्देदितीदं
वेदैः सिद्धान्तितमपि मते मेऽपसिद्धान्त एव ।
तद्वक्षोजे विरचितरतेर्विप्रवर्यस्य यस्मा-
ज्ज्ञानं[1] सर्वं लयमुपगतं प्रत्युतासीत् प्रमोहः ॥९०॥

ज्ञानं नश्येन्न कथमथवा न प्रमोहो भवेद्वा
कस्मादस्य व्यधित यदयं द्वैतबुद्धिं महेशे[2]।
चित्रं तत्तु स्फुरति विरते ज्ञानजातेऽपि जाते
मोहेऽप्येतन्मनसि भगवानात्मभूराविरासीत् ॥९१॥

तादृक् तस्मिन् समय उभयोः कापि शालीनतासी-
द्यादृक् ताभ्यां रहसि मिलने धृष्टताकाङ्क्ष्यते स्म ।
वामा रीतिः कुसुमधनुषो हन्त मध्येऽन्तरायं
कर्तुं [3]तस्मिन्नयमवसरे सात्त्विकानादिदेश ॥९२॥

एवं काञ्चित्समयमुभयोरप्यभून्मौनमेव
प्रादुर्भूता तदनु वदनाद्भारतीति द्विजस्य ।
कस्मिन् मार्गे मृदुतनु पदं न्यस्तवत्यस्तशङ्कं
शाके यस्मिन्न मम मनसाप्युत्सुकेनापि गन्तुम् ॥९३॥

[4]भाग्यस्यैवोपरि मम पयोजाततज्जातं त्वयैत-
न्न्यस्तं मन्येऽपचितिविधया पूज्यतामागतस्य ।
कांस्वित् कृत्वोपकृतिमनयोरेष आनृण्यमेष्या-
म्याज्ञां विज्ञे वितरसि यदि त्वं तदेवाचरामि ॥९४॥

इत्याकर्ण्य प्रणयिवचनं लोचने [5]चारयन्ती
नीचैः पाणिं प्रसृतमभितः पाणिना [6]वारयन्ती ।
मन्दस्मेरे वदनकमले शोभयन्ती नकारं
याता तस्मिन्नवसर इयं काञ्चिदन्यं प्रकारम्॥९५॥

---

1. B, D सर्वं ज्ञानं for ज्ञानं सर्वं

2. A. B, D महेशो. C महेशै. On close scrutiny it appears that in B, an attempt was made later to change महेशो into महेशे.

3. A, B, C, D कस्मिन्. But the emendation is reqired by the context.

4. C भागस्यैवोपरि. 5. B वारयंती. 6. C चारयंती.

हस्तेनासौ वपुषि निहितं यत्र [1]यत्रापनिन्ये
हस्तं निन्ये कविरपि पुनस्तत्र तत्र प्रसह्य ।
वामा नीतिः स्मरनरपतेः पश्यताहो प्रयाता
प्रीतिस्तस्मिन् समय उभयोर्याद्विरोधेन वृद्धिम् ॥९६॥

शैलो येन जितः सुखेन तदधःस्थानं तु यत्नं विना
जेतव्यं खलु तेन कौतुकमिदं दृष्टं तदानीं पुनः ।
तादृक् तस्य कुचोपरि करावस्थापने नाभव-
द्यत्नोऽजायत मेखलापरिसरे कर्तुं करं यादृशः ॥९७॥

[2]नकारं सीत्कारः स्मितमथ [3]निरोद्धुं प्रियकरं
करं [4]यान्तौ प्रान्तेक्षितमपि दृशोर्भ्रूकुटीविधिम् ।
विषेहे नैतस्मिन् समय इति भेदे सति मिथः
कथं नोपादद्याद्यवनभुवमुद्योगरसिकः ॥९८॥

रसावेशोऽध्वर्युर्विलसितगणः सभ्यनिवहो
युवा यज्वा यस्मिन्नपि च शमिता शम्बरारिपुः ।
त्रपामेधे तस्मिन् कुतुकमिदमालोकि निखिलो
निखातोऽन्तःकुण्डं यदभजत यूपः फलपदम् ॥९९॥

इति निधुवनक्रीडामेतौ परस्परमादृतौ
निशि निशि तथा कुर्वाते स्म स्मरेण सुशिक्षितौ ।
पुनरपि यथा दुष्प्रापेयं भवेन्न भवेद्यथा
न कृतमिदमित्यन्तस्तापो [5]दिवा विरहे सति ॥१००॥

अनुनिशमवशिष्टं कर्तुमासीन्न किञ्चित्
किमपि न कृतमेवं प्रत्यभात् तु प्रभाते ।
यवनपतितनूजे प्रोषिते भाग्यभाजो-
रिति विविधविलासैर्वासराणि व्यतीयुः ॥१०१॥

रस एव स ईश्वरः श्रुता-
विति निर्णीमतोऽभिधीयते ।
चिमनीचरिते रसाश्रयं[6]
वचनं चेन्न मम श्रमः श्रमः ॥१०२॥

---

1. A यत्र तत्राप०
2. B transposes stzs. 98 (नकारं etc.) and 99 (रसा-वेशो etc.) 3. A विरोद्धुं. 4. B यातौ.
5. A, D ०त्यन्तस्तापो.
6. B, D रसाश्रितं.

रिक्तीकृते निजतया भवभूतिमुख्यै-
र्भिक्षाटनं कृतवतः[1] पुनरुञ्छवृत्त्या
क्षेत्रे यदत्र खननेन ममार्थलाभो
यः कोऽप्यभूदिह महेशकृपैव हेतुः ॥१०३॥

[2]शुक्लजनार्दनपुत्रो वत्साचार्यस्य दौहित्रः ।
पठितालङ्कृतिशास्त्रो भट्टश्रीमण्डनच्छात्रः ॥१०४॥

[2]हीराभिधानपातिव्रतमहासि प्राप्तनिजजन्मा ।
कविनीलकण्ठशर्मा निरमाच्चिमनीचरित्रमिदम् ॥१०५

[3]मिहिरमुनीन्दुमितेऽब्देऽतिक्रान्ते विक्रमादित्यात् ।
शिवरात्रौ शिवपदयोर्निजकृतिराधायि नीलकण्ठेन१०६

[4]इति नीलकण्ठकविकल्पितं
चिमनीचरितं समाप्तम् ।

---

1. A,B,C,D कृतवता 2. D om. stzs. 104, 105

3. B मिहर [विक्रमात्] अतिक्रान्तो विक्रमादित्यात् ।
शिवरात्रौ शिवपदयोर्निजंकृतिराधाय नीलकण्ठेन ॥६॥
C महिस्मुनींद्रदुमितेऽतिक्रांते विक्रमादित्यात् ।
शिवरात्रौ शिवपदयोर्निजकृतिराधायि नीलकंठेन १०६
D om. this stanza.

4. *A* इति नीलकण्ठकविकल्पितं चिमणीचरित्रं समाप्तं संवत् ॥१७२६॥

B इति श्रीचिमनीचरित्रं संपूर्ण ॥

C इति श्रीनीलकंठकविकल्पितं चिमनीचरितं समाप्तं संवत् १८०० चैत्र सुदि १ तिथौ लिखितोयं प्रति वाप यशः सोमगणिना श्रीसुद्धदंत्यां श्रीजिनकुशल-सूरिजीप्रसादात् शुभं भवतु लेखकपाठकयोः श्रीः ॥

D इति नीलकंठविकल्पितं चिमनीचरितं समाप्तम् ।



Index of Stanzas in the Chimanī-charitam

GADHEṢA-NṚPA-VARṆANA-SAṀGRAHA-ŚLOKĀḤ

By

G. V. Bhave

(A newly discovered Sanskrit Manuscript)

The above is another original Sanskrit manuscript discovered in the stock of Pandit Vasudeo Rao Govilkar of Mandla, and can in a way serve as a supplement to the Ms. Gaḍhesa-Nṛpa-Varṇanam discovered by me and published in the 1940 number of the Nagpur University Journal. The Ms. consists of twelve leaves, with written matter closely covering twenty two pages. It is written in a soft black ink, and shows a uniformity of hand throughout, though letters may be found varying in size, which makes one conclude that the compiler is one and the same person whoever he may be. Our Ms. is complete in its form, but surprisingly enough, unlike the general feature of all other Sanskrit Mss., this one gives no hint whatsoever about the name of the compiler or say copyist and of the date of its compilation, but since it has quoted from Gaḍhesa-Nṛpa-Varṇanam of Rupnath, the latest of all poets quoted, it is safe to believe that our Ms. was prepared in the first quarter of the 19th century, as Rupnath died not later than 1800 A. D. All due attempts were made to find out one or two more copies of our Ms., so as to test the correctness or otherwise of the text, but of no avail, though some more scraps of paper, containing nearly half the matter of our Ms., have been discovered at another place. But the Govilkar copy of the Ms. is in a tolerably sound condition.

Gaḍhesa-Nṛpa-Varṇana-Saṁgraha-Ślokāḥ, is, as the name implies, nothing but a collection of ślokas or verses, being quotations from different poets, in praise of different Gond rulers of the Gaḍhā Maṇḍlā dynasty. The noteworthy thing about these poets is that many of them belonged to Maṇḍlā and a majority of them came from the same family of which Lakṣmī-prasāda, the author of the unpublished Sanskrit Ms., namely Gajendra-Mokṣa, was an offspring. There are 13 poets in all

and they are, irrespective of their chronological order, (1) Dīkṣit, (2) Jaya Govinda, (3) Narhar Mahāputra, (4) Keśava, (5) Tāresh, (6) Viṭṭhal, (7) Thakkur, (8) Rūpanath, (9) Viṣṇu Dīkṣit, (10) Vaidya Nāth Dīkṣit, (11) Ghanśyām Mishra, (12) Hari Dīkṣit and (13) Lakṣmīprasād. Of these Nos. 1, 4, 6, 9, 10, 12 and 13 belong to the Dīkṣit family of Maṇḍlā, while the others were born in different families. The informtion, as locally gathered about some of these, is being put down in the following few lines :—

(1) *The Dīkṣita Family.* A good deal of information about this family is available in the 9th sarga of Gajendra-Mokṣa mentioned above, wherein we learn that the founder of the family in Mandla was one Vishnu Dikshit ot the Kashyapa Gotra who hailed from Selagrāma. Now, Vishnu Dikshit laarned in the Vedas, after a stay at Benares, was invited by Prem Sahi, and Gangadhar Vajpeyi and others were his pupils. His son Vaidyanath would teach, in the town of Ram Nagar, during the time of Hridaya Shah, Dharma Shastra, Kavya and Vyakarana to many, and Vaidyanath's son, Hari Dikshit, would recite, every day, the Puranas to the King Maharaj Shah. He died a happy death on the bank of Narbada at Mandla, leving behind him four sons of whom the youngest was a Pauranic under the royal patronage of Nizam Shah. This was no other than our Lakshmi Prasad who offered his now famous composition, " Gajendra Moksha ", at the feet of Nizam Shah on the Vijaya Dasmi day of Samvat 1815, corresponding to A. D. 1755. The other three brothers of Laxshmiprasad were Gangadhar, Sadasheo and Pasupati. Laxshmi Prasad's mother was named Laxmi who was the daughter of one Vasudeo of the Atri Gotra, who had received honours at the hands of the lord of Bandhava Gadha, the modern Rewah. According to Gaḍhes Nṛp Varṇanam Prem Shah ruled at Gadha during 1652–1671 A. D., and Vishnu Dikshit happened to arrive at Gadha some time during this period, his great grandson adorning later on the court of Nizam Shah. Therefore four successive generations of the family authentically received royal patronage under nine successions of Gaḍha Mandla Kings at Chaura Gaḍha, Ram Nagar and Mandla, covering a period of more than hundred years. Vithal Dikshit and Kesheo were

immediate predecessors of Vishnu Dikshit, and their eulogies about Dalpati Shah and Vir Narayan, Chandar Shah and Madhukar Shah make one believe, and reasonably so, that they had known sufficiently about these kings. Wherever only the denomination, Dikshit, occurs in our Ms., I have not been able to identify it with any proper name of the family, though the composer of the first verse of our Ms. I am inclined to believe to be Anant Dikshit, the father of Kesheo Dikshit, describing as he does the qualities of Dalpati Shah. A local Hindi chronicle has supplied a *list*[1] of 36 names of the family where Laxshmiprashad is found to be the last. Nothing further is known about the family beyond Laxshmiprashad, though here and there names of certain descendants of his are found on certain Mss. as copyists and in some cases as original writers. For example at one place we find a śloka, "

" शुक्रेऽलिखद्वैद्यनाथः श्रावण्युत्सर्गपद्धतिम् ।
अब्देऽश्वेभेभभूयुक्ते पौषे शुक्लेऽर्कजे तिथौ ॥ "

or, at another, a line— " ग्रहा ऋषि ... भूसंख्ये वत्सरे मासि फाल्गुने । गढायामलिख ...... चिन्तामणिसूनुः गदाधरदीक्षितः । "

Any way, the family was a Maharashtra family and produced a long tradition of Sanskrit scholars of high worth, among whom Lakshmi Prashad was the most brilliant star and can safely be called the second edition of Magha, for his superior style of chaste versification. The present descendants of Laxmi Prasad living at Mandla have not so far been able to supply the link straight up to the great poet, but one fact is certain that their previous generation was well-versed in the Vedas.

Thakkur. By this term we have to understand Mehesh Thakkur, the descendant of that Thakkur of Bhaur who according to Rupnāth was a religious preceptor of Yado Rai. Mahesh

[1] वासुदेव–जनार्दन–रघुनाथ–विट्ठल–राम–भास्कर–बोपदेव–विनायक–दत्तात्रेय–नृसिंह–नारायण–रामचंद्र–गोविन्द–गणेश–रघु–राघव–द्विजराज–वामन–श्रीकृष्ण–गोपाल–हलायुध–चक्रधर–हेरंब–रमाकांत–गजानन–श्रीपति–त्र्यंबक–शंकर–गंगाधर–अनंत–केशव–विट्ठल–विष्णु–वैद्यनाथ–हरि–लक्ष्मीप्रसाद–.........

Thakkur was originally a rèsident of Tirhut, Bihar, and flourished during the time of Dalpati Shah and after him, of Durgavati who both, as husband and wife, as well as, separately, would listen to him, with great devotion, reciting the Puranas in Bansipur near Chaurgarh. Once it happened, so we read in local records, that Mahesh Thakkur could not attend to his daily duties and sent, instead, his pupil Raghunandan as his substitute. The latter efficiently discharged his duties, but on some presonal remark about him from Durgavati he felt offended and went directly to Bastar where he obtained from the ruler many costly gifts including eight elephants, one being grey coloured. This last one he presented to Durgavati and proceeded straight to Delhi along with Mahesh Thakkur. At Delhi he obtained from Akbar, the then Emperor of Dehli, a free gift of the territory, of Darbhanga with an annual yield at that time of Rs. 50,00,000, and got it registered in the name of his Guru Mahesh Thakkur. They then both, the master and the pupil, proceeded to rule at Darbhanga, and then the preceptorship was conferred on Damodar Thakkur, the youngest brother of Mahesh Thakkur. Damodar continued to be Royal preceptor in the court of Gond Kings upto the time of Chandra Shah, but when, after the death of Chandra Shah, he refused to officiate at the installation ceremony of Madhukarshah for the latter's cruel acts of murder of his father and brother for obtaining the throne, Damodar was asked to leave the territory and was also deprived of his Jagir of Rs. 12000. Damodar then went to his brother at Darbhanga where he lived till his death. The known immediate predecessors of Mahesh Thakkur are Jñānapati Thakkur, Purushottam Thakkur, and Padmanabha Thakkur and the known descendants of Damodar are chronologically Kamal Datta Thakkur, Ruchipati Thakkur, Jageshwar Thakkur, Indrapati Thakkur and Prem Nidhi Thakkur. Though the family is quite extinct at Mandla, yet the village Maheshpur, Tirhutia Tal and Thakur Tal, near Gaḍha, established by the family, are still to be traced. The family played an important part in the time of some Gaḍha rulers, and a śloka about Raghunandan is still heard in the mouth of the learned at Mandla as,

प्रातर्भूतकदंबिनी परिवृढद्विष्वक्‌ तमःशंकया
दिक्चक्रं पुरतो मुधैव चकिता चक्रित्वमालोकसे ।
श्रीमद्दस्तरभूमहेन्द्रवदनांभोजप्रसादोदया–
दायाते रघुनन्दने गजघटाघंटारवः श्रूयते ॥

Narhar Mahapatra. Local chroniclers mention two Mahapatras having visited the Gond capital Chaurgarh during the reign of Durgavati, one being Gop Mahapatra and the other Narhar Mahapatra. Gop was a bard who was specially deputed by Akbar to observe personally the condition of things prevailing in the kingdom of Durgavati and then to comment on them to the Emperor. But Adhar Kayesth the minister of Durgavati arranged for his warm reception throughout the state and he returned highly pleased. As for Narhar, he visited the court of Durgavati immediately after Akbar recognised the claims of Vir Narayan to the Gadha throne. The queen was highly delighted at his learning and poetry and gave him a gift of wealth amounting to one crore of rupees. While Gop was a Hindi poet, Narhar composed poems in Sanskrit. Nothing is known whether these two poets were anyway related, beyond that they were contemporaries and that they had come from the Delhi side. One or two Mahapatra Families are no doubt found in the Mandla District even now, but they have nothing to do with our poets.

Jay Govind. He is the composer of the famous Ram Nagar Sanskrit Inscription which is a long eulogy of the Gadha Mandla kings beginning with Yado Rai and stopping at Hridaya Shah, plainly because he died during the time of this last ruler. As is mentioned clearly in the 50th stanza of the Inscription, he was the son of the poet Madan who was well versed in Mīmāṁsā, Logic, and Prosody, and as can be amply testified by the Inscription itself, he was a learned Sanskrit poet of a high order, each single stanza of the Eulogy being enough to justify his claim as a great poet. As is commonly believed in learned circles, he was not a Bajpeyi in the sense of the famous Bajpeyis of Mandla. He was a Jujhotia Brahman pure and simple, in the service of Hridayashah. When Sunder Deo, the Khattri wife of Hridaya-

shah, constructed many gardens, temples and wells in Ram Nagar and wanted to perform the Udyapan vidhi in this connection, the members of the Vajpeyi family proper refused to officiate, saying that as she was not a duly married wife, they could not partake of food from her hands. At this Jay Govind was, after some ceremony, declared a Vajpeyi who then assisted the queen in her performance of the necessary religious rites. Reports go to show that the conclave of learned Brahmans assembled on this occasion at Ram Nagar was quite unique at least in this part of the Province. No further information about Jay Govind or about his descendants is available.

Rupnath. Some information has already appeared about the poet in the 1940 number of the N. U. J. I would therefore attempt here to amplify the same a little further. Rupnath was a Maithil Ojjha Brahman with a tradition behind him of learned forefathers well equipped in Sanskrit lore and duly honoured by kings everywhere. So far two works of his have been published and they are Ram Vijaya Kavya, termed also a Maha Kavya, published by the Government Sanskrit College, Benares, and Gaḍheṣa Nṛpa Varṇanam published in the Nagpur University Journal of 1940. In his Gaḍheṣa Nṛpa Varṇanam the poet has also referred to the last king, Summer Shah, of the royal dynasty, which king died in 1789 A. D. Rupa Nath was the contemporary of the Maratha Subah, Moraji, who died in 1796 A. D., as also of the well known Subhamkar Ojjha who was born in 1775 A. D.


Now in the learned Sanskrit preface of the above named Ram Vijayakavya we find that Lakshmi Datta, the second son of Rupnath, died in Samvat 1930 at the ripe age of 80; and the popular belief prevalent here is that Rupnath died at the age of 90. Making sufficient allowance for the birth of his first son Yajña Dutta, there is no harm to arrive at the following inference: Laxmi was born in Samvat 1850, at which time Rupnath was probably 25 years old. Rupnath himself was born in Samvat 1825 equal to 1768 A. D. Laxmi Datta's son Chandra has written a Praśasti in which he has said a great deal about the merits and acquirements of our poet who knew Mīmāṁsā, Veda, Vyākaraṇa and other things, and says in the same,

" आसीन्मैथिलमंडलीषु विलसाद्विद्यावतामग्रणीः ।
माहिष्मत्याधिलब्धदेवमांहिमा श्रीरूपनाथः कृती ॥

Rupnath has also composed some small poems such as Rtu Varnana, and attompts would be made to discover them, also, for publication. His son Lakshmi Dutt who has composed a poem named Tirtha Prabandh has also written a commentary on Ram Vijaya Kavya, but the whole of it is not available, only the first two sargas having come to my hand in the original. That Rupnath was leading an ascetic life can be corroborated by a story. Before coming to Mandla to settle there permanently he lived for many years at Ram Tek and there he acquired nearly a lakh of rupees. On his way to Mandla he was waylaid by the Pindaries who robbed him of all his money. The poet, the very living form of contentment, instead of feeling aggrieved at the misfortune, expressed relief that he was relieved of the burden! There are one or two more such stories about him but space does not permit to give them all *here.* [1]

Ghanshyam Misra. He was either the son or the nephew of Sheoram Misra who was a relative brother of Prem Nidhi Thakkur, the descendant of Mahesh Thakkur spoken of above. He was the pupil of Laxmiprasad who took him to Saugor with him. Out of the nine Sargas of Laxmiprasad's Gajendra Moksa, nearly seven were composed by the great poet, while the rest proceeded from the pen of Ghanshyam. And for the following couplet I am indebted to Pandit Ganesh Datta Pathak, B.A., of Mandla :—

" सर्गषट्कं साष्टपद्यं कविनालेखि सागरे ।
शिष्टं सर्वं घनश्यामः तत्प्रीतमनसालिखत् ।



Gajendra Mokṣa was composed in Saṁvat 1815, and assuming that Ghanshyam was then 30 years old, he may have been born in Saṁvat 1785. He was therefore very much older than Rupnath.

Taresh. Everything about him is in the dark. Of all these 13 poets, seven were Mahārāṣṭrians, 3 were Maithil, one was a Jujhotia, one a Northern Khattri and only about one nothing can be said.

In the collection of the matter in this Ms. whether by the choice of the complier or by their intrinsic merit, description in the case of four or five rulers is found in ampler details than in that of others, and they are Dalpati Shah, Durgavati, Premshah, Hridayashah and Nizam Shah. And out of his anxiety to stick to mere praise of the Dynasty the compiler has very cautiously avoided any direct reference to the family intrigues that were a regular feature of the later rulers of the dynasty. But references to some plain historical events were unavoidable on his part, and I would try to take for discussion in brief only three or four among them.

(A) *Marriage of Dalpati with Durgavati* : Our Ms. says that Dalpati obtained the permission of his father and accompanied by his priest and choice army marched and captured Durgavati, the daughter of the Chandel King, and eloped with her. This shows if anything that Dalpati Shah's father, Sangramshah, had his full consent in this heroic mischief on the part of Dalpati. No doubt the example of Prithiviraj and Sanyogita was brilliantly running before them but this alone was not enough. The fact that Dalpati's illustrious father, Sangram Shah, had perhaps been widely known for his extensive power and that Dalpati was himself conscious of his firm position must have encouraged him to take this extra bold step. Otherewise to take up a quarrel with the Chandel king of Mahoba was nothing less than facing a lion in his own lair. To know the antecedents of the marriage we have to take the help of the local chroniclers who affirm that both Dalpati and Durgavati were in love with each other, each being extraordinarily charming by form and figure. Durgavati at last wrote a letter to her lover at Singor Gadh that she had seen him in her dream and that if he really

loved her, he should go to Mahoba on the Vasant Pañchamī day when her parents usually went out to visit the temple of Durga, situated outside the town. Dalpati accordingly took with him a force of 12000 soldiers and carried away his object of love to Singor-Gadh where the marriage was performed with due rites.

(B) *Suryasimha Hada and Jusharsimha*: The next thing worthy to be taken note of here is the important reference in our Ms. to two historical figures, Surya Simha Hada and Jushar Simha Bundela who appear to have been no better than mere usurpers. Strange as it may seem Hindi Gazetteers like Jubbulpore Jnyoti edited by Rai Bahadur Hiralal, as also the Ram Nagar Inscription, are quite silent on the point. Nor does the Gadhesa Nrpa Varnanam speak anything about them. The C. P. Gazetteer no doubt states that Chandar Shah after Vir Narayan's death transferred his capital from Singor Grah to Chaurgadh which fell into the hands of the Bundelas and that Prem Narayan was slain (Vide C. P. Gazetteer, 1868 Ed. page 217). Here there is only an indirectly suggestive hint at the name of Jushar Simha but not the least to that of Surya Simha. Our Ms. says in clear terms that Surya Simha Hada ruled for three years and Jushar Simha for two, and that both were killed in battle; (Vide stanza No. 45). This is supported by the Govilkar list of Gadha Mandla kings, where the names of these two usurpers are included just after Vir Narayan and Prem Narayan respectively. (See N. U. J. of 1940, pp. 200-201). Their mischievous activities seem to be historical possible facts when we remember that in those days disorder and anarchy were frequent happenings in these parts particularly because after the joint rule of Durgavati and Vir Narayana, nearly every Gadha Mandla king, for seven to eight generations, had to get the sanction of the Delhi Emperor for his accession to the throne. This possibility is strengthened by the local Hindi chroniclers who say that, when Adhar Simha Kayestha returned from Delhi after settlement in favour of Chandar Shah, he turned out Hada from Madan Mahal to Delhi and seated Chandar Shah on the throne in Samvat 1592, and further that, eight years after the death of Adhar Simha, Hada usurped the throne at Gadha where in Samvat 1615 he constructed a tank and named it as Surya

Talao and also raised his standard there. Now this date, samvat 1615, falls between the period of Samvat 1613–1616 which is given in the Govilkar list as the period of Surya Simha Hada. Therefore we can believe in Hada having possessed Gadha for three years. This Hada seems to be some Bundela chief who must have accompanied Asaf Khan during the latter's conduct of campaign against Durgavati. One naturally expects to read about him in V. A. Smith's Akbar, but one only meets with utter disappointment. The wrongful possession of Gadha by Hada was put an end to by Madhukar Sahi.

About the Jushar Singh incident the local chronicler has this to communicate to us: when Madhukar Shah burnt himself in Samvat 1643, equal to 1586, A. D., his son Prem Narayan who succeeded to the throne was at Delhi at the time. Vir Simha Deo of Orchha also happened to be there on some mission and invited Prem Narayan to his camp to dine with him, but the latter unceremoniously declined the invitation. Whereupon Bir Singh Deo returned to his capital smarting under the insult. He himself wanted to punish Prem Narayan but soon he was taken abed. At the time of his death the Bundela chief called to his death-bed his three sons Pahar Singh, Juharsingh and Hardol Lala, and pledged them to capture Gadha, imprison Prem Narayan and release him only when he would partake of the rice from their hands. Failing which they were not to be called his sons! What a queer type of revenge for such a minor little thing as non-acceptance of an invitation! The second thing to which the three sons were pledged was that they must take from Prem Narayan a promise not to yoke cows for the tilling of fields in the Gondwana. True to this oath both Pahar Singh and Jushar Singh came and besieged Chaurgadh, but the fort defied the besiegers for nine long moths. Then a stout and strong man, through some trick, went up and lifted the king away in his worshipping posture, and keeping him somewhere in the open, pierced his head mostly with his teeth.[1] This happened in Samvat 1662. Hridaya Shah was at the time at Delhi. At this

[1] According to another local chronicle Premshah along with Jaydeo Vajpeyi was invited to Jushar's camp and there treacherously killed while both were at worship.

he immediately started from there, came to Gadha, took the help of Bhopal rulers and attacked Chauragadh where Jushar Singh ruled, Pahar Singh being at Orcha. Jushar was killed and the fort was taken possession of by Hridayashah. Hridayashah, however, like a noble ruler that he was, sent the family of Jushar to Orchha with all due honour. Now, the Govilkar list gives Samvat 1662 as the date of Jushar's death, while the local chroniclers use this date for the death of Prem Narayan, which gives a clear difference of two years. But fixing of dates being not the main point of discussion here, it is left for some other occasion. Our Ms. has to say something about Jushar's character that he was an irreligious and sinful fellow and that he met an untimely death as a result of his own sins.

This episode of Surya Siṁha Hada and Jushar Siṁha Bundela requires further investigation at the hands of competent historians, because as yet only half-naked facts have been available.

(C) *Literary Merits of the Collection* : As I have hinted above quite a good amount of space has been devoted in our Ms. to the description of Nizamshah who was for all practical purposes the last king of the dynasty. The reason seems to be that two very competent poets who were contemporary to Nizam Shah find an honourable place in it. People of the old generation are yet living in Mandla who, though depending on hearsays mostly, yet possess many recollections about the king. Making all allowances for the poetic exaggeration about Nizam Shah as administrator the fact has to be admitted that he had very much in him that makes him entitled to be called a highly cultured and humane king. As an administrator, our poets tell us that, he was as powerful as the sun (95), could pierce through the enemy-flanks like a man standing in the midst of showers of rain-water (98), seeing whose powers even the sun fell senseless for a time into the water (104), and also that no enemy could stand before him (108). His efficiency as a master-hunter was carried to such an extent that even tigers in the forest dreaded him (110), and at the enormous speed of his horse—he was an expert rider—even the mind, the Garud and the wind, famous for their swift movements, forget their own speed (111).

But look at other things in him which we have no reason to deny but have every reason to admire. He was a chintamani and a Kalpa Druma as well as a Kamadhenu (96) solely on account of his munificent gifts: and there are people even now living whose fore-fathers owed much to Nizam Shah. He was a religious minded man and worshipped different deities without a distinction (113) and he beautified the fort and the town of Mandla by erecting new and fine construction (115). His subjects were contented and happy because they had plenty of every thing (105), and he was above all things a lover of learning and a patron of learned people (119), also proved by the cases of Laxmi Prasad and Rup Nath among others. A man with a soft heart like Nizam Shah could also display iron-courage when so required. He thrust Mohan Singh, an extremely strong man and an intriguing relative of his, into a bag and after having sewn it, had it flung into the river! Ajit Singh, a dependent chieftain of his, created troubles in the kingdom to the extent of getting possession over a portion of land including Maharajpur, on the river Narbada opposite Mandla itself. Nizam Shah got him arrested through means of Vishram Simgh, his minister, and had him dashed against the wall!

The numbering of stanzas in the Ms. is a very unsystematic and irregular affair. In between the 7th and 8th stanzas there appears an un-numbered stanza, and the stanza No. 22 is found not numbered after which appear the three stanzas as are numbered repeatedly as 21, 22, and 22. The stanza coming after the 28th has no number and this is suddenly followed by number 39. After 39 appear numbers 31, 32, twice 33, 34, twice 35, 36, 37, 38, 39 followed by numbers 31 to 40 in regular sucession. Then number 41 occurs twice, regularly followed by numbers 42 to 66. Then again number 67 comes twice followed by Nos. 68 to 83 in good order. Then No. 84 also finds itself repeated twice whereafter come numbers 85 to 95 in their due order. We again see number 96 twice followed by numbers 97, 98 to 102 and then again suddenly are three numbers 3, 4, 5, 6, and 7. All this arrangement is difficult to understand, but the total number of the stanzas in all is unmistakably 126.

Our Ms. has quite a large variety of Metres, nearly nineteen, many of which are sweet to read and pleasant to hear. Some of these such as the Shārdul Vikridit and Sragdharā are of the popular taste, while such others as Avitathā and Pra-mitākṣarā are of a rare occurrence. Shardul Vikridita occurs here nearly 20 times, while Sragadharā more than 40. Our Ms. represents different grades of standard and style because it has a collection from several writers not of the same attainments. We read there compositions of all sorts from those which present a bare fact told in a blunt manner untouched altogether by any figuration to those where-in one finds oneself engulfed into and surrounded by twisting and coiling creepers of highly metaphorical phraseology. Can there be a more plain construction than,

"उर्वरा सर्वतो भूमिर्मध्यतो नर्मदा नदी" ?

Many kinds of figures are used by all these our poets, Simile and Metaphor being most predominant. Examples of Simile such as :- "शिव इव शिवराजाह्वयः" etc., and "माहिष्मत्यमरावतीव सुखदा," those of metaphor of the type of "नृपदलपतिसाहौ वैरिवक्रेन्दुराहौ प्रतिभट-पवनाहौ" etc., "कुलकमलदिनेशो वैरिदावानलो यो," and चन्द्रिका यस्य कीर्तिः"; examples of प्रश्नालंकार as "किं कर्पूरचयः किमिन्दुमणयः किं मौ-क्तिकश्रेणयः" and those of Alliteration such as "मदनसदनमध्ये," "चलदलविलशुष्के," "यस्य प्रोद्यत्प्रतापप्रथमपरिचयप्रद्रुतभ्रष्टनिद्राः," "रामवद्रामारामविहाररामसहजो" etc. do, if anything, heighten the charm that one feels in reading these stanzas.

TEXT OF THE MANUSCRIPT

" गढेशनृपवर्णनसंग्रहश्लोकाः । "[1]

दीक्षितः—

दलपतिसुमतिर्बभूव तस्य
क्षितिपमणिस्तनयः पवित्रकीर्तिः ।
अभिलषति मुखानि यस्य कीर्तिं
चिरयुगातुमिथंति नागनाथः[2] ॥ १ ॥

श्रुत्वा विप्रमुखात्स्वयंवरवरे स्वाकर्षणं प्रमत-
स्तातात्ज्ञां परिलभ्य यो हि गतवान्सत्सैन्यनद्धिप्रयुक् ।
अद्दृष्टाश्वतिथौ युते दलपतिर्निर्मथ्य स्वारोधकान् ।
श्रीचंदेलसुतां जहार बलवान् दुर्गावतीं श्रीमतीम् ॥ २ ॥

रसराज[3] (?) तिथियुक्ते हायने भूढ्ढशो
नृपदलपतिसाहिः सिंहदुर्गे स्थितिर्यत् ।
वलय उमरखानो भूजवावो रुहिला
वरमतिसचिवोस्या धारकायस्थधीरः ॥ ३ ॥

जयगोविन्दः—

वितरणवारिभिर्नियतमार्द्रकरस्य हरिस्मरण-
परायणस्य[4] वशीभवतां ।
निरुपाधिपालितप्रकृतिकस्य हि यस्य सदा
चरणरजो रजोगुणजुषो जना जगृहुः ॥ ४ ॥

दीक्षितः—

नृपदलपतिसाहौ वैरिवक्रन्दुराहौ
प्रतिभटपवनाहौ पीवराजानबाहौ ।
चलति भुवनपाली साब्धिद्वीपाधराली
फणितिलकफणाली द्रागिद्वफाली बभूव ॥ ५ ॥

[1] [In the foot-notes G. C. stands for Govilkar Copy of the Ms., R. I. for Ram Nagar Inscriptions, I. C. M. for Incomplete Copy of the Ms., and G. M. for Gajendra Moksa].

[2] This stanza also occurs as No. 16 in R. I. and probably may have borrowed it from some one of the learned Dikshit family.

[3] G. C. itsefl has the corrected form as " गुणगजातिथियुक्ते ".

[4] R. I. has additionally " शरणस्य " before " वशीभवताम् " and " अपि " before " जना जगृहुः ".

दलपतिनृपराज्ये याचको याचकोऽभूत्
प्रतिगृहधरणी–श्रीपूर्ण–विद्याविलाशं[1] ।
कुलकमलदिनेशो वैरिदावानलो यो
मदनसदृशरूपः सुंदरी यस्य दुर्गा ॥ ६ ॥
भुवि सुरपतिकल्पं भोगमापाथ सल्पं[2]
वसुसममथतीते स्वर्गभोगातुरोऽभूत् ।
गुरुचरणपयोज्यं योर्च्य भक्त्या द्विजान्यान्
गजकनकसुरत्नैस्तर्प्य रेवांबुगोगात् ॥ ७ ॥
द्वापंचाशदमंदघोटकवरारोहाः सहस्राः सदा
सेनायां द्विरदोन्मदामनुशतं लक्षोद्भटापत्तयः[3] ।
राजंते पुरजां[4] स्वधर्मनिरतादाने मृधे तत्परा
नार्धि यस्य जना विदंति नृपतेस्त्रैकोटिराज्ये सकृत् ॥ ८ ॥

अथगोविंदः---

अभ्यर्थिनां भाग्यसमृद्धिरेव
स्वरूपिणी पुण्यपरंपरेव ।
सौभाग्यसीमेव[5] वसुंधराया
दुर्गावती तस्य बभूव पत्नी ॥ ९ ॥
पुरंदरे भूवलयस्य तस्मि-
न्नस्तं प्रयाते तनयं त्रिवर्षं ।
श्रीवीरनारायणनामधेयं
दुर्गावती [6]राज्यपदेभिषिंचत्[7] ॥ १० ॥
अत्युच्चैः कनकालयैः परिलसन्निस्सीमहेमाचला
सर्वत्रैव [8]लुठत्सुरत्ननिचयैर्निःसंख्यरत्नाकरा ।
उद्दामद्विरदव्रजैरगणितस्वर्गेशदंतावला
भूरन्यैव कृताऽखिल[9] त्रिभुवनप्रख्यातकीर्त्या यया ॥ ११ ॥

[1] It ought to be विलासं.
[2] Here सोल्पं is more appropriate as it agrees with यो below.
[3] This seems to be लक्षोद्भटाः पत्तयः ।
[4] Instead of पुरजां the word must be पुरजाः ।
[5] R. I. shows सीमैव in the place of सीमेव.
[6] R. I. gives राजपदे.
[7] The correct form is अभ्यषिंचत्.
[8] R. I. has लुटत् in actual.
[9] In R. I. the word appears to be अखिला used independently to qualify भूः ।

तुरंगमातंग-सुवर्णकोटि-
निरंतरोत्सर्गमयाह्निकाया:[1]।
अशेषकीर्ति किलकामधेनो-
र्यशोभिरुच्चैरधरीचकार ॥ १२ ॥

नरहरमहापात्रः —

का त्वं पातकपुत्रिका विपदहं पौत्री कलेः किं ततो
गाढं रोदसि सोदरस्य महता कष्टेन कः सोदरः।
[2]दारिद्रः खलु तच्च केन निहिता राज्यायदुर्गाख्यया
तस्मात्कोपवशेन यामि सततं तद्वैरिवृंदालये ॥ १३ ॥

केशवः--

सा श्रीशूरशिरोमणेर्दलपते राज्ञी रमेवोत्तमा।
यां शंसंति द्विजोत्तमा नृपवराः सम्यग्दिशामंतरे।
सत्याशक्तमनेन्दुवज्जनिधराकर्णेव दाने सदा
सा संख्ये प्रबलारिवृंद-हरिणी[3]-दुर्गेव दुर्गावती ॥ १४ ॥
यस्याः कीर्तिलता त्रिधा ह्यवलिता याता च मंदाकिनी
गंगा भोगवती मनोज्ञफलदा नामेति धत्ते स्फुटं।
नाके भूमितले फणीशभवने सद्भिः सदा सेविता
सा संख्ये प्रबलारिवृंदहरणी दुर्गेव दुर्गावती ॥ १५ ॥
उर्वरा सर्वतो भूमिर्मध्यतो नर्मदा नदी।
विज्ञा दुर्गावती राज्ञी गढाराज्ये त्रयो गुणाः ॥ १६ ॥

जयगोविन्दः—

स्वयं समारुह्य गजं रणेषु
बलाज्जयंती प्रबलान्विपक्षान्।
सदा प्रजापालनसावधाना
सा लोकपालान्विफलीचिकार ॥१७॥
सैहव गृह्णन्सकरेण राज्ञां
तदार्जितं विश्वविसारि तेजः।
विवेश तारुण्यमनंतकीर्तिः
श्रीवीरनारायणनामधेयः ॥ १८ ॥

---

1 In R. I. the letter या is without a Visarga in the original.

2 These two words are apparently wrong; they ought to be दारिद्र्यं and निहितं respectively.

3 "हरिणी" ought to be "हरणी".

तारेशः—

सर्मे सर्वतिथौ सर्वे पाठकानोंगढामगात् ।
सर्वान्वये विरामे तत्पदं कृत्वा तमार्जुनिः ॥ १९ ॥
कृत्वाल्पं वाजपेयं दलपतिजकृपात् माधवः सानुजो यः
सर्वे पौत्रात्मजोभूदकबरनृपगीर्नाचर्य येनेभहेतोः ।
आधारेन्तर्गतेभूत्स्वयमथ सचिवो युद्धमुत्पादितो यत्[1]
भीत्या प्राक् प्राप मृत्युं बहुरणविजयी सांबभूयोंतमीयात् ॥ २० ॥

जयगोविन्दः—

कालक्रमादकबरक्षितिपुरहूतेन पार्थकल्पेन ।
प्रहितः कराय बलवान्नासफखानस्ततो राज्ञा ॥ २१ ॥

अक्षौहिणीनम्रितभूतलेन
जाते[2] रणे तेन महाभटेन ।
बलं विचिंत्यापि[3] समस्तमस्य
दुर्गावती भीमपराक्रमेण ॥ २२ ॥

संविक्षिता लक्षविपक्षबाणैः
स्वपाणिखड्गेन शिरः स्वकीयं ।
छित्त्वा क्षणेन द्विरदे निषण्णा
भिनद्रवेर्मंडलमात्मजश्च ॥ २३ ॥

[4]दीक्षितः—

श्रीवीरनारायणसिंहदेवः
कृत्वाथराज्यं नयनाक्षिवर्षं ।
दिल्लीशसैन्यं कतिधा विजित्वा[5]
श्रीकेशवं युद्धछलादगायः ॥ २४ ॥

दिल्लीधवादेशकृतादरेण श्रीसूर्यसिंहाख्यमहाबलेन ।
राज्यं त्रिवर्षं परिपाल्यचाशु हाहापमृत्युं समरे च तेन ॥ २५ ॥

---

[1] The correct form should be उत्पादितं to agree with यत्.
[2] R. I. has याते for जाते, but I. C. M. gives जाते.
[3] We read विजित्यपि in R. I.
[4] In I. C. M. stanzas 24 and 25 are not to be found.
[5] This is decidedly an ungrammatical form; instead, विजित्य is wanted here.

[1]अकबरनृपपेशाक्रांतराज्यं हि ज्ञात्वा-
ऽऽदिसचिवमतिसज्जश्चागतो देवदुर्गात् ।
तदथबलमहोग्रं बाहुवीर्येण जित्वा
सपदि सचिवहस्ताद्योचरद्दाननीतिं ॥ २६ ॥

कुर्वायिचोकीगडरायसेनं
भोपालभोरासगुनारदारीं ।
मर्कायिकालोपवनं सरातं
[2]दिल्लीधनं चार्प्य निरामयोभूत् ॥ २७ ॥

[3]दलपतिनृपतेरथानुजन्मा शरणमनाथजनस्य चंद्रसाहिः ।
निधिरिव महसामखंडदीपः सकलकुलस्य यशोधनोभिषिक्तः॥२८॥

वस्त्राण्याकृष्य केशग्रहमपि तरवः कुर्वते कंटकैः स्वैः
श्वासैर्यास्तान् दहंति द्रुतविवृतवपुर्दीप्तदावान् प्रदर्श्य ।
नैष्ठुर्येणैव नित्यं दधति च वसितुं यास्त्वचः पादपानां
कान्तारे शत्रुकान्ताः कलहमिव सहस्थावरैर्यस्य चक्रुः ॥ २९ ॥

विट्ठलदीक्षितः—

[4]रसशशिसमभोगं प्राप भूपो गडायां
रिपुगणभयहीनो भीमकल्पोद्धशक्तिः ।
मदनसदनमध्ये प्राप यः खड्गमृत्युं
हरिपदममलोगाच्चंद्रसाहिर्गढेशः ॥ ३० ॥

---

1 The I. C. M. gives the following variant of this stanza :—

अकबरक्षितिपेनाक्रान्तराज्यं हि ज्ञात्वा
पवनज इव रोषादागतो देवदुर्गात् ।
यवनपतिबलोग्रं बाहुवीर्येण जित्वा
निजक्षितिरमणोभूच्चन्द्रसाहिर्नरेन्द्रः ॥
(सपदि सचिवहस्ताद्दाननीतिर्व्यधायि)"

2 This whole line is found in I. C. M. thus :—

" दिल्लीपतेरर्प्य गढाधिपोभूत् " ।

3 This stanza as also the one following are also found in R. I., numbered 27 and 28 respectively.

4 This stanza is missing from I. C. M., and instead another irrelevant stanza is found there which is thus :—

वसुनवशरचंद्रे तीर्थराजप्रयागे तपसि धवलपक्षे द्वादशीपूर्वयामे ।
शिखिनि तनुजहोमः सार्वभौमाधिपत्यं सकलदुरितहारी ब्रह्मचारी मुकुन्दः ॥

जयगोविन्दः—

समजनि तनयो नृपस्य तस्य
स्मरदहनादिव षण्मुखः सुकीर्तिः ।
निधिरिव महसामिहोर्जितानां
मधुकरसाहिरिति [1]क्ष्मातलेन्द्रः ॥ ३१ ॥

प्रत्यग्रप्रौढगाढप्रलयजलधरध्वन्यधःकारिढक्का—
धावद्धुंकार-धाराबधिरितविधुतध्वस्तधीरोद्धतेन ।
येन प्रोद्दामधाम्ना भुजबलविहितैः शश्वदाशादिगीशान्
अद्यापि स्पष्टमष्टाजनगणरटितैस्तज्जयैर्लज्जयन्ति ॥ ३२ ॥

[2]अथ मधुकरसाहिः चापराज्यं गढेशो
जनकहननप्रायश्चित्तमाश्वाचरद्यः ।
चलदलविलशुष्के गोमयाज्यैदुलिप्तं
स्वकरदहनताङ्गं दीपितो दिक्समांते ॥ ३३ ॥

ठक्कुरः—

[3]चूडामणिर्जन्मदमेधकृत्ये
स्वाचार्य आसीदभृथेथ तस्मै ।
तत्सांगतां यः पवियीं नृपोदाद्
काशीमगायो नृपवन्नृपांते ॥ ३४ ॥

[4]साधूनामभिलाषसिद्धिविभवः क्षात्रं समग्रं महः
शक्तिर्मुक्तिमती स्मरस्य भवनः कीर्तिः कुलस्योन्नतिः ।
सर्वस्वं सुकृतस्य कौशलमिति स्रष्टुर्गुणानां निधि-
र्दोषानामपथं सुतोऽस्य नृपतेः श्रीप्रेमनारायणः ॥ ३५ ॥

[1] R. I. has क्षमा in the place of क्ष्मा.

[2] I. C. M. substitutes the following stanza from Rupnath:—

नृपमधुकरसाहिः प्राप राज्यं गढायां
कलुषमलिनदेहो राज्यसौख्यं व्यसृज्य ।
अथ दहनयुतायां शुष्कगोधेर्वपायां
(त्रि) र्दिवजसुखमीप्सुर्दाहयामास देहम् ॥

[3] This stanza is not found in I. C. M.

[4] This stanza and stanzas 36 and 37 occur in R. I. numbered 31, 32 33 respectively there. In the place of the words "मुक्तिमती" and "भवनः" in R. C., R. I. and I. C. M. show "मूर्तिमती" and "भवनं" respectively, while "दोषानां" of G. C. is found to be "दोषाणां" in R. I.

प्रेम्णोद्यद्विंध्यगन्धद्विरदघनघटाघोरसेनासहस्र[1]
प्रत्यग्रप्रौढजाग्रद्विरमितदलिताऽ[2] शेषभूभृद्गणस्य ।
यस्य प्रोद्यत्प्रतापप्रथमपरिचयप्रद्रुतभ्रष्टनिद्रा
नाद्यापि द्राग्विपक्षा जहति गिरिदरीः सुन्दरीभिर्वियुक्ताः ॥ ३६ ॥
प्रौढाः[3] सर्वक्षितीशाः समरभुवि बलाद्बन्धनीया न वैरं
कीर्तिर्लोके च दानैरविरलविहितैर्वर्द्धनीया न गर्वः ।
दातव्यं सर्वदैव द्रुतमभिलखितं याचकेभ्यो न पृष्टं
भूपानामेष धर्मः स्फुटमिह चरितं प्रेमसाहेः प्रमाणम् ॥ ३७ ॥

रूपनाथः—

प्रेमसाहिनृपतिर्द्विजभक्तो
वैष्णवो विविधधर्मविधाता ।
व्याधिराधिरभवन्नजनानां
यत्र शासति महीमवनीशे ॥ ३८ ॥

यश्चोरागढभूमिमेत्यमनिशं संपालयन् विक्रमै-
र्यज्ञैर्देवगुणान् सुरेशसहितान् संतोषयन् कामतः ।
दानैर्मानपुरस्सरैर्द्विजवरान् संपूजयन् सर्वदा
लक्ष्मीकांतपदारविंदमधुपो राज्यं चकारेप्सितं ॥ ३९ ॥

गजेन्द्रमोक्षः—

कृत्वा संग्राममुग्रं नरपतितिलकोप्यायुषः पूर्तिहेतो-
र्यद्वंशे प्रेमसाहिः क्षितिभृदितिपदं विष्णुलोकं गमिष्यन् ।
पातिवृत्या[4] द्धरिण्या निजकुलजगढादेशभूभृत्सुसत्यं
कृत्तेन स्वेन मूर्ध्ना रदधराणिधृतः ख्यापयामास नूनं ॥ ४० ॥
धृतिसममथ[5] भोगं प्राप्य राज्ये नरेशो ।
हरिपदयुगपद्मेऽचंचला यस्य भक्तिः ।
सुरपुरसुखमीप्सुः पुण्यसंग्रामभूमा-
वकबरबलछद्मात्पातयामास देहम् ॥ ४१ ॥

---

[1] R. I. gives प्रोन्माद्यत् for प्रेम्णाद्यत् ।

[2] In R. I. this whole line stands thus :—
"प्रत्यग्रप्रौढधारावनमितविधुताशेषभूभृद्गणस्य" ।

[3] R. I. substitutes "एत्र" for "सर्व" त्र for न after लोके, अविरत for अविरल and अभिलषितं for अभिलखितम् ।

[4] G. M. has "पातिव्रत्याद्धरण्या" for "पातिवृत्याद्धरिण्या".

This stanza is wrongly put under G. M. as my Ms. copy of G. M. IX does not contain it ; nor does it occur in R. I. and I. C. M. Its authorship is thus far unknown.

पूर्णानेक[1] कलातिथिः प्रतिपदा लब्धोदयः सर्वदा
ऽहोरात्रप्रथमानमासमहिमासत्कृष्णपक्षक्रमः।
तस्मादब्द इवापरः समजनि श्रीप्रेमसाहिः प्रभो-
र्नाम्ना श्रीहृदयेश्वरः सुखयिता पूर्वप्रभावः सतां ॥ ४२ ॥

[2]मुख्योधिकारी हृदयेशराज्ये
भूपप्रियो भागवताग्रराव: ।
संज्ञार्थवित्तन्नृपतेर्गुलालो
मृजावलेशो ह सकृद्दिजो भूत् ॥ ४३ ॥

गजेन्द्रमोक्षः—

राज्यं ज्ञात्वान्यदीयं त्वरितमुपगतस्त्यक्तादिल्लीशसंगो
द्वापंचाशत्स्वदुर्गस्थितरिपुवसतीरेककालं विहत्य ।
शत्रुं हत्वारिरामास्वपुरनयनकृत्स्वांगढादेशभूमिं
पातिव्रत्यैकमत्या दशरथसुतवत् भूसुतां हर्षयन् सन् ॥ ४४ ॥

[3]अकछपक्षसैन्ययुक् जुशरसिंहबुंदिला
कराब्दराज्य भोगभुक् बभूव हनिधर्मधीः ।
स एककाल आशु वै द्विपंचवीरयुक् छली
ह्यकालमृत्युमाप संगरे निजाघकर्मतः ॥ ४५॥

विष्णुदीक्षितः—

[4]मार्तण्डोद्दण्डचण्डद्युतिरिव समरे लक्ष्यतेऽकक्षपक्षा-
स्तेऽलक्षाऽछाःकमिक्षुः सपदि गिरिदरीः सुन्दरीभिः प्रविष्टाः ।
तद्रामाऽक्ष्यश्रुधारां घनरसदघटालक्ष्यमन्दाक्ष्यमीयुः
प्राहुस्ताः कान्तशान्तिं हृदयनरपतेर्मन्युवह्नेर्नयामः ॥ ४६ ॥

गजेन्द्रमोक्षः—

तत्पुत्रो भूमहेन्द्रो हृदयनरपतिः सर्वविद्याप्रवीणान्
वीणावाद्यादिहीनान् विबुधकविवरान् नन्दयन् स्वीयबुध्या ।

---

[1] This stanza which is from R. I. No. 34 wrongly finds place under G. M. here. "लब्धोदय: " of the 1st line is seen as "रब्धोदय: " in R. I. as well as in I. C. M. and "श्रीप्रेमसाहिः", in the 3rd line should be either "श्रीप्रेमसाहे:", or without a Visarga so as to be compounded with "प्रभो: ".

[2] The authorship of this stanza also is beyond decision. It is just possible the compiler of our Ms. might have obtainted it as an independent piece of composition from Laxmiprasad the author of G. M.

[3] The above holds good in the case of this stanza also.

[4] I. C. M. substitutes "घनघनरसदा" for "घनरसदघटा" occurring in the 3rd line.

तुल्यं देवेन्द्रपुर्य्या नगरमभिधयारामपूर्वं नवीनं
यश्चक्रे दार्शि यत्र द्विजविहितमखैर्यत्र धर्मश्चतुष्पात् ॥ ४७ ॥

विष्णुदीक्षितः—

ये गण्यंते गुणज्ञैर्मघवति सुगुणाशीतरश्मौ दिनेशे
वित्तेशे धर्मराजे मरुति हुतिवहे ये जलेशे प्रतीच्यां।
दृश्यंते भूतलेस्मिन् हृदयनरपते ते समस्ताः सुराणां
वर्ण्यंते सत्कवीन्द्रैरनुदिनमखिलैर्नागवंशे गढेशे ॥ ४८ ॥

वैद्यनाथदीक्षितः—

कीर्णैरध्वनि कुंतलैः प्रतिपदं पाशोपमैर्यंत्रिता
[1]निःस्वासैर्हृदयेशदावसदृशैः संतापिता निःसहैः।
नेत्राद्रैघनबिन्दुभिर्निगमिता रात्रिंदिवं त्वद्भया-
दात्मीयैरपि वैरिवारिजदृशो बाधाशतं निन्यरे ॥ ४९ ॥

जयगोविंदः—

[2]स च पालयन्निखिलमेव जगन्नितरामनाथवति क्षितिपः।
समवर्षणाप्यतिशयेन घनः पयसाऽभिषिंचति निम्नगतम् ॥ ५० ॥

रम्यारामपरंपरापरिवृताः सौधालयैरुन्नताः
संपन्नप्रजया भृताः सकमलैः स्वच्छैः[3] शरोभिर्युताः।
येन व्यायतनैकघोषरुचिरा विष्वग्विशालोर्वरा
विप्रेभ्यः स्मृतताम्रपट्टविधिभिर्ग्रामाः कियन्तोऽर्पिताः ॥ ५१ ॥

स्वस्थानैः स्वरभेदबोधकरणं संग्रा[म][4] तालोचितं
संपूर्णश्रुतिधर्मरागरुचिरं तत्कूटनानाश्रितं[5]।
सन्मार्गस्थितिचित्तहारिसुलभं यत्किनराणां महत्
साम्राज्यं निजमुद्दधार सकलं संगीतशास्त्रं च यः ॥ ५२ ॥

अचला[6] निखलाऽखिला नृपाला हृदयेशस्य ममुः करेऽमुनैव।
[7]लिखताश्चनकैकभित्तमध्ये ननु पंचाशदिव द्विपा महान्तः ॥ ५३ ॥

---

1 The correct form found in I. C. M. is "निःश्वासैः", and the last word in the stanza "निन्यरे" must be correctly "निन्यिरे".

2 R. I. has the word "हि" after "ऽभिषिंचति".

3 "शरोभिः" ought to be "सरोभिः" which is also found in R. I..

4 R. I. and I. C. M. both have "सद्ग्राम".

5 "तत्कूट" also occurs in I. C. M. but R. I. gives "तत्कण्ठ".

6 G. C. and I. C. M. both have "निखला" but R. I. shows "निखिला" which form is more appropriate.

7 "लिखताश्चनकैक" occurring in I. C. M. also is found to be "लिखिताः कनकैक" in R. I., and the "भित्त" occurring in all the three is wrong. It ought to be "भित्ति". This error was also noticed by Hall.

अभूदणीकस्य[1] चले तु लक्ष्ये न विस्मयः कश्चन तेन विद्धे।
तिर्यक् परिक्षिप्तशरः[1] शरैर्यः स्थले स्थले त्वेकपदे छिनत्ति ॥ ५४ ॥

यस्योपरीयमिंद्रोक्तिः—

अयि वद विमनाः कुतोऽसि जिष्णो
विबुधवरा विदितं नवः किमेतत् ।
हृदयनरपतिर्यदेष विप्रान्
[2]भुवि दधाति शतक्रतूननेकान् ॥ ५५ ॥

घनश्याममिश्रः—

प्रस्थाने हृदयक्षितीशरमणे त्वद्वैरिवामभ्रुवा
त्वल्लुंटाकभटाहृतोत्तरपटा तेनुस्तरांद्दक्छटाः ।
किं कर्पूरचयः किमिंदुमणयः किं मौक्तिकश्रेणय-
स्तेषां यावदभूद्विगाहितमतिस्तास्तावदीर्युदरीः ॥ ५६ ॥

वैद्यनाथः—

सौधश्रेष्ठतमेंद्रमंदिरसमे संस्थः सदा पूजयन्
स्वर्णैर्भूसुरवृंदमादरयुतैर्यं भूहरिं मेनिरे ।
नानाकेषविदं[3] कलासु कुशलं रामौघमध्यस्थितं
क्रीडंतं रमणीयमूर्तिमनिशं कामोपमं कामुकं ॥ ५७ ॥

रूपनाथः—

नयनाश्ववर्षमवनीं[4] सपालयन्
विविधं मखं च विदधद्दयान्वितः ।
सुरलोकभोगमधिकं विचारयन्
सुरधाम कामवशगो जगाम किं ॥ ५८ ॥

[1] While R. I. shows "अणीयस्य", I. C. M. shows both the forms and "शरः" is found to be "शरं" in R. I..

[2] In R. I. we read "भुवि विदधाति" for "भुवि दधाति" and the R. I. form answers the metrical requirements.

[3] G. C. also gives a variant of the 2nd half of the stanza as follows :—

"रामारामरणैकशूरकुसलं कंदर्पदर्पापहं
"नानामन्मथसास्त्रसारविदुषं कामोपमं कामुकम्" ॥

For our text I am inclined to take the form as "नानाकेलिविदम्"।

[4] Gadhesa Nṛpa Varṇanam has "नयनत्रिवर्ष" in the place of "नयनाश्ववर्ष". (See page 191 of N. U. J. of 1940). Our present Ms. which gives 72 years as the regnal period for Hridayesh is in agreement with the period popularly held for him.

जयगोविन्दः—

अभवत्सुंदरी देवी राज्ञी तस्य महीपतेः।
सौभाग्यसदनं पुण्यसंपदेव स्वरूपिणी ॥ ५९ ॥

[1]दारिद्र्यदुःखौघनदानवारिभिः
निरंतरप्रस्तुतदानवारिभिः।
गजाघनाभाघनदानवारिभि-
र्यतः सदाप्ता क्षितिदानवारिभिः ॥ ६० ॥

अविरतमुत्तरोत्तरानिबंध्यवदानकृते-
र्मितमवकाशमेत्यभुवनेषुगतैर्घनतां।
शरादिजशीतरश्मिशत[2] शाध्यनिकरै-
र्जगति यदीयपेशलयशोभिरशोभितराम् ॥६१॥

दीर्घिकारामकासारप्रमुखैर्भूरिदाक्षिणैः
पूर्तैरनंतैर्या धर्मं निरंतरमपालयत् ॥ ६२ ॥

विष्णोः शंभोर्गणेशस्य दुर्गायास्तरणेश्च या।
व्यधितस्थापनामिदं विधाय विबुधालयं ॥ ६३ ॥

तस्या स्तवायकः[3] शक्तः शंकरः श्रीधरादयः।
सुपर्वाणोपि महता[4] प्रतिष्ठा प्रापता यया ॥ ६४ ॥

तत्र नियुक्तैर्विप्रैरुपहारैरुत्सवैर्धनैरमितैः।
या[5] सुंदरी त्रिविक्रममुख्यान् देवान् सदार्चयांचक्रे ॥ ६५ ॥

हृदयेश महीपालो जिगाय नितरां तया।
[6]शक्तिः प्रकर्षक्षमया चन्द्रश्चन्द्रिकया यथा ॥ ६६ ॥

विष्णुदीक्षितः—

आसिंधुविजितधरणिस्तरणिस्तेजोभिरजनितनयोऽस्य।
श्रीछत्रसाहिनृपतिर्यस्यसुदृष्टिः सुरद्रुमवनम् ॥ ६७ ॥

निलीयसुप्तोपि भये प्रबोध्यते
सुरैः कथं जाग्रदुपैति निर्वृतिम्।
हतद्विषच्छत्रपतेरतो हृदि
श्रिया सहाचर्यमवाप केशवः ॥ ६८ ॥

---

1 The first line in R. I. is read to be as under :— " दरिद्रदुःखौघनिदानवारिभिः " ।

2 R. I. has " शतसाध्यविकाशकरैः " ।

3 R. I. has " स्तावाय " which does not fit in with the rules of prosody.

4 All these three words in R. I. are read to be " महिताः प्रतिष्ठां प्रापिता " ।

5 In the place of " सुन्दरी " we read in R. I. the word " सुन्दर " joined with the following words as " त्रिविक्रम " etc.

6 Here " शक्तिः " is wrong; it ought to be " शक्तिप्रकर्षः " as in R. I. to qualify both " हृदयेशमहीपालः " and " चन्द्रः " ।

गजेन्द्रमोक्षः—

पात्रं[1] नीत्यादिशास्त्रव्यसनभवमुदां शूरतोत्कृष्टगात्रं
दात्रं दुर्हृत्तृणानां क्षयरहितमथो कल्पवृक्षाऽग्रपत्रं ।
पुण्यं कृत्वातिमात्रं द्विजकथितमयो वर्धयामास चायुः
सच्छत्रं क्षत्रियाणां हृदयनरपतेर्नन्दनः छत्रसाहिः ॥ ६९ ॥

सुरतरु[2] इव भूमौ याचकेभ्यो भवद्यो
हृदयसुखदराजा घुर्घुरी ग्रामवासी ।
मुनिसममथराज्ये प्राप भोगं महात्मा
हरिपदयुगभक्तो विष्णुलोकं ततोगात् ॥ ७० ॥

कशरांशः[3] सुतस्तस्य वसुधावासवो भवत् ।
यशोभिर्यस्य भृत्वापि म्रीयन्तेपि दिशो दश ॥ ७१ ॥

दयाऽशङ्कतया विधावर्जनियाऽप्रामाण्यशङ्कोदिता ।
येनाऽनेकगुणावितीर्यशमिता स्वेष्टेषु पूर्तेषु च ॥
एकस्तस्य निदर्श्यते क्षितिपतेः छत्रेशसूनोर्जग-
द्वाप्तुः केशरिसिंहनामनृपते राज्याभिषेकक्रमः ॥ ७२ ॥

वर्षे पृथ्वीवेदमुन्येकसंख्ये
फाल्गुन्यन्ते मासिपक्षे वलक्षे ।
एकादश्यां शुक्रवारे सुलग्ने
सर्वोर्वीशः केशरीन्द्रोभिषिक्तः ॥ ७३ ॥

सुग्रामा बृहदुर्वरा हयवरा माघाद्विपाः कांचनं
सद्रत्नारभणानि[4] धान्यनिचयो दास्यो गृहा धेनवः ।
सौवर्णाम्बरडम्बराणि विधिवत्पर्यङ्कपात्रादिकं
दत्तं केशरिसाहिभूमिपतिना येनैव यद्वांछितम् ॥ ७४ ॥

[1] This stanza finds in I. C. M. over stanzas Nos. 67 and 68.

[2] This fine stanza is of an unknown authorship and has been wrongly included under the heading "Gajendra Mokṣa" in our Ms.; but the idea developed herein is similar to the idea in stanza No. 39 in Gaḍesa Nṛpa Varṇanam which is as follows :—

" छत्रसाहिधरणीपतिरासीत् तत्सुतो विविधयज्ञविधाता ।
सप्तवर्षमवनीं परिरक्ष्य यो जगाम सुरधाम महीयान् ॥

[3] The author of this like that of the previous stanza is not known and its inclusion here under G. M. is wrong. This same remark applies to the following three finely worded stanzas.

[4] This ought to be " सद्रत्नाभरणानि ", and I. C. M. gives the correct form.

दीक्षिताशिषः—

वृद्धिं[1] धर्मविधौ यशस्त्रिभुवने प्रीतिर्भवानीपदे।
श्रीमत्केशरिसिंहभूपतिमणेर्दीनेषु दानं दयाम्॥
आरोग्यं वपुषि प्रभुत्वमखिलं क्षोणीरतिः सन्मता-।
वानंत्यं पुरुषायुषे वितनुतां वेतुण्डतुण्डः सदा॥ ७५॥
आज्ञापात्राणि यस्य क्षितिपतिनिकराश्चन्द्रिका यस्य कीर्तिः
कल्पाग्निर्यत्प्रकोपः सुरतरुविपिनं यस्य दृष्टिप्रसादः।
यस्याभिप्रायसिंधुर्भुजबलाधिजिता रत्नगर्भैव कोषः
सूर्यो यस्य प्रतापः क्षितिपकुलमणेरास्तिकस्तस्य तुल्यः॥७६॥

गजेन्द्रमोक्षः—

कान्त्याकामोपमानोप्यनुपममृदुताकाम्यमानोपमेयो
दुष्टेभानां विमर्दे खरतरनखरः केशरीव प्रतात्[2]।
ऐश्वर्यं देवदेवाभिलषितमधिकं दर्शयामास लोके
पुत्रो यः छत्रसाहेर्नृपमुकुटमणिः केशरीसाहिराजा॥ ७७॥

रूपनाथः—

अभूत्केशरीसाहिसूनुस्तदंते
प्रकृत्या सुचारुस्त्रिवर्षं महीयान्।
महीपालितामेत्य यः स्वर्गसौख्यं
समीहाचकारेन्द्रकल्पः[3] कलाढ्यः॥ ७८॥

तत्सूनुः सप्तवर्षः प्रलकरघनाकारवंशाग्निशत्रून्।[4]
दिल्लीशोपात्तसैन्यान्निधनमपिनयन् स्वां भुवं यो बभार॥
सत्यं तस्मात्सभूभून्नरपतिभिरयं स्वं पतित्वं त्यजद्भि-
र्नित्यं चासेविसर्वैरथ तदभिधया भून्नरेन्द्रः क्षितीशः॥ ७९॥

रूपनाथः—

नरेन्द्रसाहिर्नृपतिस्तदंते बभूवराजा पुरुहूतकल्पः।
यो बालभावेन गतं हि राज्यं पुनः पुनः स्वं वशमाचकार॥८०॥
वेदाब्धिवर्षं[5] परिपाल्य पृथ्वीं
पुत्रौ समुत्पाद्य विधाय यज्ञान्।

---

1 In this stanza the mistakes noticeable in this Ms. in common with I. C. M. are "प्रीति", "मणे", and "क्षोणीरति". These ought to be "प्रीतिं", "मणेः" and क्षोणीरतिं" respectively.

2 This should be "प्रतापात्" as also given in G. M.

3 "हा" should be nasalised. This stanza does not occur in I. C. M.

4 As supported by G. M. the word here should be "प्रलय". This stanza is from G. M. and should be classified under that heading in our M. S.

5 The reading in the Ms. published by me in 1940 issue of N. U. J. is "बाणाद्रिवर्षं".

भुक्त्वा च भोगान् विविधान् जगाम
सुरालयं सूर्यसमानतेजाः ॥ ८१ ॥

गजेन्द्रमोक्षः—

आसीदासीमभूमीनृपतिरथ महाराजसाहिर्नरेंद्र-
पुत्रः पार्थेन तुल्यो धनुषि पितृहिते लंजिका दुर्गामामः[1] ।
श्रुत्वा प्राप्तं स्वशत्रुं स्वबलमथपुरः प्रेषयित्वान्यमार्गे
धावन्नेकः पुरस्ताद्रिपुबलमवधीन्नाम विश्राव्य बाणैः ॥ ८२ ॥

हरिदीक्षितः—

राजश्रीयुवराजराजसि[2] महाकालीकटाक्षोदया-
द्ये याताः तत्रसन्मुखेऽस्त्रकुशलास्तान् हन्यसे पार्थवत् ।
दाने कर्ण इव क्षितीशमदहा भक्तः पितृ रामवद्
रामारामविहाररामसहजो वेन्दूपमस्ते यशः ॥ ८३ ॥

गजेन्द्रमोक्षः—

श्रीमान् शस्त्रास्त्रतंत्रप्रवचनपटुताख्यात[3] आजानबाहु-
स्तेजस्वी यस्य राज्यं प्रतिगृहधरणीपूर्णलक्ष्मीनिवासः ।
चातुर्वर्ण्यप्रजानामनुपममहतो रञ्जनात्सार्थनामा
सर्वैः पूज्यो महत्वादथ जगति महाराजसाहिक्षितीन्द्रः ॥ ८४ ॥
शूरः सूरप्रताप[4] कतिचिदथ दयन् दक्षिणासैन्यपालात्
दिल्लीशेनापि दत्तं नृपतिभिरितरैर्दंडनाम्ना धनं यत् ।
नाङ्गीकुर्व्वन् प्रदातुं भटपशुहननं युद्धयज्ञं विरच्य
स्वप्राणान् दक्षिणां यो व्यतरदनुपमः पुण्यसंग्रामभूमौ ॥ ८५ ॥
इन्द्रस्यैन्द्रे पदे स्वे स्वरगमणिगवां दातृताया महत्त्वे
सौंदर्ये दस्रयोर्वासापितृकयमराजस्य तेजोहमोश्च ।
शंकात्यागस्य सत्या सुरयुवतिगणस्योत्तमेशस्य लाभे
भूयाद्विष्णोरिवासो यदि न नरपतिर्विष्णुलोकं गतोभूत् ॥८६॥

1 All the three Mss. — G. C., I. C. M. and G. M. give this same reading as "लंजिका दुर्गामामः", when in reality गा must be ग; and further in the 3rd line, as differernt from G. C. and I. C. M., G. M. gives "सशत्रं" in the place of "स्वशत्रुं".

2 "राजसि" seems to be wrong. A more correct form would be "राडसि" being capable of breaking into "राट् + असि". This whole stanza is missing from I. C. M..

3 In I. C. M. and G. M. the word is "आजानबाहुः" which is a very rare form as a substitute for "आजानुबाहुः".

4 A Visarga is essential after the word "प्रताप" as we find it in I. C. M. and G. M..

रूपनाथः—

नृपालो महाराजसाहिस्तदंते सदा संगरं कर्तुकामोतिकोपि ।
प्रजापालने दत्तचित्तः सदा यो धनुर्धारणे फाल्गुनेनैव तुल्यः ॥८७॥
द्विचंद्रवर्षमादरान्महीं शशास यो युवा ।
जगाम रामधाम स द्रुतं रणेन शत्रुहा ॥ ८८ ॥

गजेन्द्रमोक्षः—

[1]नानादानप्रदानोज्झितमलधरणी प्राप्य भोक्तारमीशं
तत्कालाकृष्टपच्या बहुसुखमसृजत्सर्वतः सुप्रजाभिः ।
राजा राजार्चितो यः शिव इव शिवराजाह्वयो धर्मकर्मा
भर्ता सम्मानकर्ता भुवि नृपतिमहाराजसाहेस्तनूजः ॥ ८९ ॥
साक्षादिन्द्रः पृथिव्याश्चतुरवयवयुक् सैन्यमेघौघवाहो–
थैकस्या राजधान्याः सहजगमनतोयः क्षणेनारिदुर्गं ।
जित्वा कृत्वा स्वकीयं पुरपतिमचलं तत्र संस्थापयित्वा
लोके स्वीयप्रतापाधिकतरमहिमानं स्फुटीचक्र इत्थं ॥ ९०
जंबुद्वीप[2] सुखप्रदक्षितिगढाभाग्याब्धिजः श्रीमहा-
राजेंद्रामृतपूर्णदृष्टिकृपया सिक्तस्समूलः स्वयं ।
माहिष्मत्यमरावतीमुपगतो भात्येष सर्वप्रदो
राजा श्रीशिवराजसाहि नृपतिस्त्वं कूपकल्पद्रुमः ॥ ९१ ॥

रूपनाथः—

नरपतिशिवराजसाहिरासीदथ[3] जनरक्षणकीर्तिलब्धमालः ।
धरणितलमिदं स्वधन्यमासीत् यदवनतो धनधान्यसंघपूर्णम् ॥९२॥
परिपाल्य सधर्मतो महीं वै
ददमानो वसु कांचनं महीं गाः ।
प्रजपन् हरिनाम पापहारि
गिरिवर्षे हरिलोकमाजगाम ॥ ९३ ॥
ततो भवद्दुर्जनसाहिनामा
राजातपल्लोकमहर्निशं यः ।

---

[1] G. M. has an additional reading "ज्ञानाद्दान" etc. for "नानादान".

[2] This stanza is not to be found in G. M., but I. M. C. presents a slightly different version as follows :—

जम्बूद्देशजनायरार्जिततपोवृंदाब्धिजः श्रीमहा-
राजश्रीशिवराजदेवकृपयास्वच्छाप्सुसिक्तः स्वयं ।
माहिष्मत्यमरावतीमुपगतो भास्येष सर्वप्रदः
भक्तवंश्यगर्माश्वरं प्रकटयन् श्रीभीमकल्पद्रुमः ॥

[3] The version in I. M. C. is "—लब्धमानः" which is the same as in my published copy of Gadhesa Nrpa Varnanam.

षण्मासिकं भोगमलं प्रकुर्वन्
जगाम लोकं शशिसेषरस्य[1] ॥ ९४ ॥

दीक्षितः—

आयातार्थि[2] समुच्चराद्विधिवधू चंचांबिचोलांचलो
क्षिप्रोक्षिप्तमरातिवृंदनगरोद्वाहेन सांद्रीकृतं ।
श्रीमद्वीरनिजामसिंहतरणिर्दृष्ट्वा प्रतापानलं
कृत्वा वारिदमंतरांसि समये यातीति जानीमहे ॥ ९५ ॥
यो धूताश्मत्वचिंतामणिरसिकुलभूरत्नतेत्कृष्टतेजाः
यो यं भूलोककल्पद्रुम इति रहितस्थावरत्वो नृसिंह ।
यः साक्षात्कामधेनुर्विरहितपशुतायत्श्रुतं सर्ववाचा-
मेकत्वं नेति सिंहान्यपदजयाचिरं श्रीनिजामेश जीव ॥ ९६ ॥
तस्मिन्भूपे[3] प्रयाते हरिपदममलं दुर्जनाचारिसंज्ञं ।
भूमेर्दुर्योगरूपं व्यरमयत महान्पूर्णयद्राजयोगः ॥
सोयं राजाधिराजः पृथुरिव शिवराजानुजः श्रीनिजाम-
साहिर्भाग्यं पृथिव्या नृपमुकटमहाराजसाहेस्तनूजः ॥ ९७ ॥
पृथ्वीं शासत्यधीशे[4] पितरि निजपितुर्यस्त्रिवर्षोपि हर्षो-
त्कर्षाद्वर्षाघनाम्भो धरसमपरितः संवृणच्छत्रुसैन्ये ।
गत्वा तेजो महद्वा रिपुमथ वशयन्प्राप्य सौभ्रात्रमानं
ज्येष्ठेष्वन्येषु सत्सु स्वयमधिकतपो दर्शयामास सर्वान् ॥ ९८ ॥
कालाशापालहालाहलसमविकटाटोपनानामटाब्धौ
संग्रामादग्र्यधामाश्रितवति जनके सत्पितृव्याग्रजाभ्यां ।
शिष्टो यो भूविशिष्टोदितसुकृतबलाद्राज्यमुद्धर्तुमिच्छन्
शत्रुं संमोह्य बुध्या सह वसति गुणैर्भ्रातरं चक्र ईशं ॥ ९९ ॥
साक्षाद्गच्छन्[5] विपच्छन् निजपतिनृपतेर्नाशमिच्छत्समच्छं
सायंतं सैन्यवंतं गतभयमनयं तं मदांधं सबन्धुं ।
मन्वानो हन्तुमन्या सहमहसमपि स्वाशिनासन्मुखस्थो
हत्वा सत्वाधिकत्वात्पितुरनृणतया तोषयद्भ्रातरं यः ॥ १०० ॥

---

1 "शशिसेषरस्य" ought to be "शशिशेखरस्य" as it is in I. M. C.

2 "विधि" in the 1st line and "क्षिप्रोक्षिप्त" in the 2nd line of this stanza are found substituted by "विधु" and "क्षिप्तोक्षिप्त" respectively I. M. C.,

3 From this stanza on to No. 118 the collections are from G. M., but the compiler of our M. S. does not mention in clear terms.

4 In G. M. in the place of "शासत्यधीशे" we read "शासत्यधीष्टे".

5 "विपच्छन्" and "स्वाशिनासन्मुखस्थो" occurring in this stanza are found in G. M. as "विपक्षे" and "स्वासिनासन्मुखस्थो".

रामाणामादिकामः शरणगतनृपारामविश्रामधाम
शत्रूणां कालवामः प्रकटसुरनगः पूरितार्थ्यर्थिकामः।
भूपानां मौलिदामस्वजनाहितगुणग्रामभूपालरामः
साक्षादाकार[1] धर्मः स्फुरति जगति यो राजराट् श्रीनिजामः॥१०१॥
आत्तं[2] सर्वैरखर्व्वैः प्रतिजनसदनं देहलीदण्डवित्तं
सन्मत्या तद्विहत्याधिकसुकृतसमाधानकृत्या विहत्या।
स्वच्छं रत्नं सुभिक्षं सुतनयसदृशं दर्शयामास यस्यां
नैतादृग्रत्नगर्भा क्वचिदपि सुखदा तेन सम्योवनीशः॥ १०२ ॥
गांभीर्यं सद्विचार्य स्फुटविजयशसो[3] मुद्रणार्कि समुद्रो
यस्याक्षामां क्षमां किं स्थिरपतिमकरोयं क्षमानन्ययोग्या।
औदार्यं यस्य पस्यन् स्वयमगमगतः कल्पनाकल्पवृक्षो[5]
रक्षोयक्षोरगादिस्रसति[4] वचनतो वच्मि किं तस्य वीर्यं॥१०३॥
शूरामित्रप्रताप[5] प्रसरदसहसामश्यन्सशूरो
मित्रीभूयापि योन्तर्ज्वलिततमहृदा भ्रान्त एवाम्बुलीनः।
पश्चाच्छीतान्तरः सन्पुनरुदयमितः पूर्ववत्तप्त आसी-
द्बन्धुत्वं नीरजानामधिकमुदभवत्सर्वमन्यत्तथैव॥ १०४ ॥
माहिष्मत्यमरावतीव सुखदा भात्यन्नपूर्णा क्षितौ
यत्पौरा धनधान्यसंततिमहानंदाब्धिमग्नाः समाः।
यत्रालीकविलापलोललपितं कर्णे श्रुतं नानयं
श्रीमद्वीरनिजामसाहिनृपतेः पुण्यप्रतापोदयात्॥ १०५ ॥
यत्कीर्तिग्रस्तमूर्तिर्विधुरपिमृगयाक्रीडनासक्तचित्तं
(रा)जानं किं तु जानन्मृगमथपुरतोङ्के समादाय तुष्ट्यै।
दातुं धैर्यान्समुयत् पुनरधिकभयाद्विद्रुतोऽस्तं क्षयेणा-
प्यायेत्थं नित्यकृत्या विरत[6] उदये तन्मृगाङ्कः प्रसिद्धः॥ १०६ ॥
अत्रस्यैश्वर्यमत्तो बहुविधबलयक् शत्रुसैन्यं च कर्षन्
दुष्कर्मास्वाभिधर्मापनयननयनो राज्यमूलं बिभित्सन्।
राज्ञो भूत्वा द्वितीयः समरमयचयत् स्वशसेनां च जेतुं
तं दुष्टाजीतसिंहं धृतामिव पशुमा रंजधान प्रतापी॥ १०७ ॥

---

1 In G. M. we read आकारिधर्मः "।

2 From this stanza onwards pages in I. M. C. are missing.

3 "स्फुटविजयशो" is found in G. M. to be "स्फुटनिजयशसो" and "कल्पना-कल्पवृक्षो" as "कल्पनात्कलवृक्षो".

4 This is according to G. M. "पश्यन्".

5 The words from here to the end of the line are according to G. M. "प्रसरदसहतामस्यपश्यन्ससूरो".

6 "विरत उदये" should be "विरमन उदय" as per G. M..

स्वांतायस्वांतानिष्टं समभिलषति यो यस्य दुष्टोप्यनिष्टं
सोक्षीणः तत्क्षणेन क्षयमथ समुपेत्यक्षयायत्प्रतापात् ।
तस्यास्याश्वाधिरूढस्य च बलसहितस्याग्रतस्तिष्ठतोरिः
कस्तिष्ठेत्संप्रविष्टे श्रुतिषु काठिनयद्दुन्दुभिप्रौढशब्दे ।। १०८ ।।

दृष्टुं किं यस्य देवांशमयतनुबलं देवभूसेविदृश्यं
साक्षात्सिंहं गजादं जगदवमतये प्रेषयद्देववर्गः ।
आरुह्यैवेभनाथं निजगतहतये धावमानं प्रगर्जं
तं हत्वा पातययः स सटासितहरेश्वमं सर्वप्रमाणम् ।। १०९ ।।

व्याघ्रादिर्वन्यवर्गो बहुविधमृगयाखेलनेनापि येन
नागे चागे रथेश्वे द्रुतशालिल[1] चलन्नाविभूमौ स्थितेन ।
शस्त्रैरस्त्रैः पृथक्किं नरजगदुदितो हन्यते गण्यसंख्य-
स्तस्माद्दृष्टो वनानि त्यजति नहि यतः खेलनं दुष्टहत्या ।।११०।।

यस्याश्वानां स्वरूपं प्रकटप्रथुतरं वेगमत्तामहत्तां
दृष्ट्वावातोथ चेतः खगवरगरुडः स्वीयगत्यां विहीनाः ।
मत्वें किं स्वस्वनृत्यै व्यदधत सदुपायं तदानीमदृश्यो
वायुः सूक्ष्मं मनोपि प्रभुचरणतले संगतः पक्षिराजः ।। १११ ।।

यद्धर्मोद्रिक्तदन्तिस्फुटरणविकटप्रौढरूपं समीक्ष्य
येऽष्टावैरावताद्यास्तनुतनुबलतस्तेहि भीता विलीनाः ।
अत्र ब्रूमः प्रमाणं सुरपतिरथयत्प्रीतिकामः स्वनाग-
मप्राप्यान्वेषितं किं रचयति घनमारुह्यकाले[2] स्ववृष्टिं ।। ११२ ।।

देवाभेदेन सेवामनिशमथ चरन्विष्णुसूर्याम्बिकेश-
हेरम्बानां विशेषाज्जनयति महतीं कार्तवीर्यस्य भक्तिं ।
नित्यं दीपोत्सवाद्यैः दृढतममनसा शुद्धया श्रद्धया यः
साक्षान्माहिष्मतीशः प्रकटयितुमथो पूर्ववत्स्वप्रतापम् ।। ११३ ।।

किं ब्रूमो स्यात्रभूमोदितसुकृतमहो येन संतोष्य रेवां
यद्यासेन स्वदंडानुगमितधनुराकारवारित्रिभागे ।
तुर्यं भागं स्वदुर्गे धरणिजलचलत्पूरमौर्वीप्रपूर्णं
कृत्वा किं मंडलाभे पुलिनशरपथाकारिसन्मार्गसर्गः ।। ११४ ।।

प्रासादान्सप्रसादान् व्यरचयदथयान्देव राजालयस्य-
शोभां दातुं किमुच्चान्हतबहुरचनाविश्वकर्मोरुगर्वान् ।

[1] Here the word " शलिल " ought to be apparently " सलिल ".

[2] G. M. gives " सुवृष्टिं ".

तेष्वेकादर्शगेहे बहुलमणिलश[1] त्र्णसिंहासनस्थः
स्वीयैः सभ्यैरनेकास्त्रिदशपतिसभादर्शयामास सेशाः ॥११५॥

नासत्यो यं स्वतन्वा यदि सुरभिषजौ तर्हि नासत्यरूपौ
स्त्रीणां[2] सर्वांगकामो यमिहकिमुरते रङ्गहीनोपिकामः ।
श्रीशोनास्मिन्निजामासकलतनुविधौ यत्प्रदत्तास्त्यलोला
साक्षात्श्रीमान्निजामाभिध इति जगदानंददः किं स कृष्णः॥११६॥

यत्सेवां चंद्रमाः किं सुखदहिमकरैर्लम्बमानैः समंतात्
कर्तुं नित्यं दिनादौ स्वयमुपरि वसत्यात्मना छत्ररूपी ।
संध्यायामाव्रयासौ भृतक इव ग्रहे सङ्गतस्तद्गृहिण्या
रात्र्या विश्रान्त एवं पुनरपि च तथा तद्यशो वर्णयेत्कः ॥११७॥

यस्यानन्तानुकम्पा जगदुदयकरापालनं कर्म यस्या
यल्लक्ष्मीसत्कटाक्षात्प्रभवति महती राज्यसाम्राज्यसम्पत् ।
यस्यांशेनावनीशेश्वरवपुरुदयत्यन्वयं वर्द्धयन् स
श्रीशस्तं श्रीनिजामं नृपमवतु चिरंजीवनं पुत्रपौत्रैः ॥ ११८ ॥

रसेभचन्द्र(र ?)[3] वत्सरे नभस्य शुक्लपक्षके
तिथौ स्मरस्य ज्ञे दिने गदाधराधवो भवत् ।
निजामसाहिदेवभूपमौलिपादधृष्टका
नृपेन्द्रचिह्नभूषितः सुशस्त्रशास्त्रकोविदः ॥ ११९ ॥

सहस्रबाहुसेवकोरिवृंदहारको द्विजा-
र्चकोहरात्मजा पदारविंदषट्पदः ।
अजातशत्रुरर्कताप[4] रिंदुकीर्तिदिग्गत-

[1] "लशद्र्ण" ought to be "लसद्र्ण".

We find an additional stanza at the foot of the page where No. 115 occurs :—

"किं कर्णः स तु कर्ण एव विदितो राजाबलिः किं पुनः
सोपि श्रीपतिना स्व?ादतलतो लोकादधस्तात्कृतः
तस्माद्वै नरमाधवेन भवता यस्मिन्निजामार्पिता
तं प्रेक्ष्य स्वनिजामसाहिनृमणिं वीक्ष्यापरे किं नृपाः ॥

The last two lines of this stanza may be compared with the last lines of stanza No. 116 of our Ms.

[2] G. M. gives "सर्वाङ्गकामो".

[3] This stanza again is of an unknown authorship. So also the two following stanzas. But I am inclined to believe that they can be from the smooth pen of Rup Nath.

[4] This should be read as "इंदु".

श्चकार राज्यमीप्सितं हयाक्षिवत्सरामितं ॥ १२० ॥

महाधिराजराट् सुरेशभोगभोगयुक्रमे-
शलोकवासजाप्रपूर्वसौख्यमिछयन् ।
गजादिदानभिर्द्विजान् सुतोष्य यो मुहुर्मुहु-
र्निजामसाहिदेववत् जगाम विष्णुमंदिरं ॥ १२१ ॥

रूपनाथः—

निजामसाहि भू(प ?)पतिर्बभूव तत्पितृव्यकः ।
समस्तकार्यकोविदः प्रजाप्रियः प्रतापवान् ॥ १२२ ॥

यः साहिचिन्हं सकलं व्यधत्त
महायशः[1] साहासिकोऽप्रमादी ।
आखेटकी यंत्रविमोक्षदक्षः
कृपाणयुद्धे नकुलेन तुल्यः ॥ १२३ ॥

यस्य प्रयाणे गजवाजिवृंदै-
रुत्थापितो रेणुरनंतमार्गे ।
प्रभावमंत्राध्यवसायशक्ते-
रंतर्दधावर्कमयूरवजालं ॥ १२४ ॥

नरहरिसाहिमहीपः कृत्वा राज्यं च पंचवर्षाणि ।
सततं कुमंत्रसेवी[2] राज्यभ्रष्टो बभूवाशु ॥ १२५ ॥

सुमेरसाहिर्नृपतिर्बभूव
भुक्त्वा त्रिवर्षं क्षितिमंडलं तत् ।
भ्रष्टो निकामं गतवान् समुद्रं
पुनः प्रपेदे हरिमंदिरं सः ॥ १२६ ॥

इति गढेशनृपवर्णनसंग्रहश्लोकसंपूर्णं ॥

[1] This should be read as "महाशय:".

[2] Gadhesa Nrpa Varnanam gives "कुमंत्रिसेवी" in the place of this form.

METRES OCCURRING IN THE TEXT OF GADHEṢA-NṚPA-VARṆANA-SAṀGRAH-ŚLOKĀḤ

Serial No.	*Name of Metre	Nos. indicating the stanzas
1	Puṣpitāgrā	1, 28, 31, 92.
2	Śārdūlvikrīḍita	2, 8, 11, 13, 14, 15, 35, 39, 42, 49, 51, 52, 56, 57, 72, 74, 75, 83, 91, 95, 105.
3	Mālinī	3, 5, 6, 7, 26, 30, 33, 41, 70.
4	Avitathā	4, 61.
5	Upajāti	9, 23, 123, 126.
6	Indravajrā	10, 22, 24, 25, 27, 34, 43, 81, 91, 124.
7	Upendravajrā	12, 17, 18, 54, 80.
8	Anuṣṭubh	16, 19, 59, 62, 63, 64, 71.
9	Sragdharā	20, 29, 32, 36, 37, 40, 44, 46, 47, 48, 69, 76, 77, 79, 82, 84, 85, 86, 89, 90, 96, 97, 98, 99, 100, 101, 102, 103, 104, 106, 107, 108, 109, 110, 111, 112, 113, 114, 115, 116, 117, 118.
10	Āryā	21, 65, 66, 67, 125.
11	Svāgatā	38.
12	Pañcacāmara	45, 88, 119, 120, 121, 122.
13	Pramitākṣarā	50.
14	Aupacchandasika	53, 55.
15	Mañjubhāṣiṇi	58.
16	Vaṁśastha	60, 68.
17	Śālini	73.
18	Bhujaṅgaprayāta	78, 87.
19	Mālabhāriṇī	93.